(२) अभिलाषाष्टक[1] (स्कन्दपुराण, काशीखण्ड पूर्वार्द्ध, अध्याय १०)—ऋषिवर विश्वानरकी धर्मपत्नी शुचिष्मतीने अपने पतिसे प्रार्थना की कि मेरे 'शिव-समान पुत्र हो।' यह सुनकर विश्वानर क्षणभर तो चुप रहे, फिर बोले 'एवमस्तु' और उन्होंने स्वयं ही १२ महीनेतक फलाहार, जलाहार और वाय्वाहारके आधारपर घोर तप किया। फिर काशी जाकर विकरादेवी तथा सिद्धि-विनायकके समीप चन्द्रकूपमें स्नान करके वहीं वीरेश्वरके समीप अभिलाषाष्टकके आठ मन्त्रोंसे बड़ी श्रद्धापूर्वक स्तुति की। इससे भगवान् शङ्कर प्रसन्न हो गये और कुछ ही दिन बाद विश्वानरकी पत्नी शुचिष्मतीको

---

१. एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किंचित्।
एको रुद्रो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम्॥ १॥
एकः कर्ता त्वं हि विश्वस्य शम्भो नाना रूपेष्वेकरूपोऽस्यरूपः।
यद्वत्प्रत्यस्वर्क एकोऽप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये॥ २॥
रज्जौ सर्पः शुक्तिकायां च रूप्यं नैरः पूरस्तन्मृगाख्ये मरीचौ।
यद्वत्तद्वद्विश्वगेष प्रपञ्चो यस्मिन् ज्ञाते तं प्रपद्ये महेशम्॥ ३॥
तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः।
पुष्पे गन्धो दुग्धमध्ये च सर्पिर्यत्तच्छम्भो त्वं ततस्त्वां प्रपद्ये॥ ४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गर्भ रह गया। समय आनेपर उसने शिवसदृश पुत्र गृहपति (अग्नि) को जन्म दिया। अतः संतानकी कामनावाले पति या पत्नीको चाहिये, प्रातः शौच-स्नानादिसे निवृत्त हो शिवजीका पूजन करे और इस स्तोत्रका आठ या अट्ठाईस बार पाठ करे। इस प्रकार एक वर्षपर्यन्त पाठ करते रहनेसे पुत्रकी प्राप्ति होती है।

(३) पापघट-दान—किसी पातक, उपपातक या महापातकके प्रभावसे पुत्र नहीं हुआ हो तो दम्पतिको चाहिये कि वे किसी तीर्थपर जाकर किसी शुभ दिनमें पापघट-दान करें। यथासामर्थ्य सोने, चाँदी या ताँबेका ६४ पलका कलश रखकर उसपर अग्न्युत्तारणकर पञ्चगव्यादिसे शुद्ध करें। साथ ही किसी ऐसे दूरस्थ ब्राह्मणको बुलावें जो दान लेकर चले जानेपर फिर कभी देखनेमें न आवे। इसके पूर्व दिन दोनों स्त्री-पुरुष एक बार भोजनकर ब्रह्मचर्य पालन करें। फिर दूसरे दिन शौच-स्नानादिसे निवृत्त होकर शुद्ध स्थानमें पूर्वाभिमुख बैठें। सामने किसी चौकी या वेदीपर लाल वस्त्र बिछाकर उसपर अक्षतसे अष्टदल कमल बनावें। फिर उसपर यथाविधि कलश स्थापनकर उसमें घी या शक्कर भरकर आम्रपल्लव अथवा अशोकादि पत्रोंसे सुशोभित कर ऊपर पूर्णपात्र स्थापित करें। उसके मध्यभागमें सुवर्णनिर्मित विष्णुमूर्ति

शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रेरघ्राणस्त्वं व्यंघ्रिरायासि दूरात्।
व्यक्षः पश्येस्त्वं रसज्ञोऽप्यजिह्वः कस्त्वां सम्यग् वेत्त्यतस्त्वां प्रपद्ये ॥ ५ ॥
नो वेदस्त्वामीश साक्षाद्धि वेद नो वा विष्णुर्नो विधाताखिलस्य।
नो योगीन्द्रा नेन्द्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥ ६ ॥
नो ते गोत्रं नेश जन्मापि नाख्या नो वा रूपं नैव शीलं न देशः।
इत्थं भूतोऽपीश्वरस्त्वं त्रिलोक्याः सर्वान् कामान् पूरयेस्तद्भजे त्वाम् ॥ ७ ॥
त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशान्तः।
त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्किं यत्त्वं नास्यतस्त्वां नतोऽस्मि ॥ ८ ॥
(स्कं॰ काशी॰ १० । १२६—१३३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

और उसके समीप ही फणाकृति नागमूर्ति स्थापित करें। प्राङ्गणके मध्यभागमें स्थण्डिलके ऊपर पञ्चभू-संस्कारपूर्वक अग्नि-स्थापन करें। गणपतिपूजन, नान्दीश्राद्ध, पुण्याहवाचन एवं ग्रहस्थापनकर सबोंका पूजन करें। फिर भगवान् विष्णुकी षोडशोपचारपूजाकर नागकी पञ्चोपचारसे पूजा करे। फिर कुशकण्डिका करके विष्णुमन्त्रसे घीकी १००८ या १०८ आहुतियाँ दें और पूर्वोक्त ब्राह्मणका पूजनकर उसे भोजन करावें। इसी समय **'मनसा दुर्विनीतेन०**[१]**'** आदि मन्त्रोंको पढ़ते हुए प्रति मन्त्र अक्षत या दूब कलशपर चढ़ाता जाय। मन्त्र समाप्त हो जानेपर हाथमें जल, फल, चन्दन, अक्षत-पुष्पादि लेकर देश-कालादिका कीर्तनकर **'अमुकोऽहं मत्कर्तृकानेक-जन्मार्जितज्ञाताज्ञातवाङ्मनःकायकृतमहापातकोपपातकादिपूरितमिमं घटं गन्धपुष्पाद्यर्चितं तुभ्यं सम्प्रददे।'** इस प्रकार संकल्पकर ब्राह्मणके हाथमें संकल्प छोड़ दे। साथ ही थोड़ा सुवर्ण देकर उस कलशको दोनों हाथोंसे उठाकर ब्राह्मणको दे और हाथ जोड़कर प्रार्थना करे—

महीसुर ! द्विजश्रेष्ठ ! जगतस्तापहारक।
त्राहि मां दुःखसंतप्तं त्रिभिस्तापैः सदार्दितम्॥
संसारकूपतस्त्वं मां समुद्धर नमोऽस्तु ते।
त्वदन्यो नास्ति मां देव समुद्धर्तुं क्षमः क्षितौ॥

---

१. मनसा दुर्विनीतेन यन्मया पातकं कृतम्।
तत्तिष्ठतु घटे चास्मिन् गुरुदेवप्रसादतः॥ १॥
व्रजता तिष्ठता वापि कर्मणा यदुपार्जितम्। तत्तिष्ठतु० ॥ २॥
परस्वहरणेनापि पातकं यदुपार्जितम्। तत्तिष्ठतु० ॥ ३॥
सुवर्णस्तेयजं पापं मनोवाक्कायकर्मजम्। तत्तिष्ठतु० ॥ ४॥
रसविक्रयतः पापं ब्रह्मजन्मनि संचितम्। तत्तिष्ठतु० ॥ ५॥
क्षात्रधर्मविहीनेन क्षात्रजन्मनि यत्कृतम्। तत्तिष्ठतु० ॥ ६॥
वैश्यजन्मन्यपि मया तथा यत्पातकं कृतम्। तत्तिष्ठतु० ॥ ७॥
शूद्रजन्मनि यत्पापं सततं समुपार्जितम्। तत्तिष्ठतु० ॥ ८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इस प्रकार प्रार्थनाकर विसर्जन करे। फिर आचार्यको दक्षिणा देकर भोजन कराये। तदनन्तर दम्पति स्वयं भोजन करें।

(४) कृष्णव्रत—प्रौढावस्थामें भी पुत्र न हो तो यज्ञोपवीत धारण करके श्रीकृष्ण या गणेशके मन्दिरमें अथवा गोशाला या पीपल, गूलर या कदम्ब-वृक्षके नीचे बैठकर कमल, कदम्ब या तुलसीकी मालापर— **'देवकीसुत गोविन्द वासुदेव जगत्पते। देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥'** इस मन्त्रका प्रतिदिन पाँच हजार, ढाई हजार या एक सहस्र जप करे। इस प्रकार एक लाख पूरा हो जानेपर दशांश हवन, तर्पण, मार्जनकर ब्राह्मणोंको खीर, मालपूआ, पूड़ीका भोजन करावे। ऐसा करनेसे श्रीकृष्णकी कृपासे पुत्र प्राप्त होता है।

(५) गायत्रीपुरश्चरण—किसी निश्चित शुभ मुहूर्तमें प्रारम्भ करे। इसके एक दिन पूर्व उपवासपूर्वक क्षौराचरणकर दशविधस्नान करे। दूसरे दिन देवमन्दिर या बिल्ववृक्षके नीचे भगवान् सूर्यके स्वरूपका चिन्तन करता हुआ रुद्राक्षकी मालासे प्रतिदिन पाँच सहस्र या एक सहस्र गायत्रीका जप करे। साथ ही गोघृतसे दशांश हवन भी करता जाय। जपके बाद प्रतिदिन जौकी रोटी और मूँगकी दाल बनाकर भोजन करे। अन्न स्वकीय ही होना चाहिये। चौबीस लाख जप पूरा हो जानेपर पुरश्चरण सम्पूर्ण होता है। यह पुरश्चरण यदि निर्विघ्न समाप्त हो जाय; तो व्रतकर्ताको धन, धान्य, प्रतिष्ठा, पुत्रादिकी प्राप्ति होती है।

═ ★ ═

गुरुदाराभिगमनात् पातकं यन्मयार्जितम्। तत्तिष्ठतु० ॥ ९ ॥
अपेयपानसम्भूतं पातकं यन्मयार्जितम्। तत्तिष्ठतु० ॥ १० ॥
वापीकूपतडागानां भेदनेन कृतं च यत्। तत्तिष्ठतु० ॥ ११ ॥
अभक्ष्यभक्षणेनैव संचितं यत्तु पातकम्। तत्तिष्ठतु० ॥ १२ ॥
ज्ञाताज्ञातैरनेकैश्च घटोऽयं सम्भृतो मया।
पूर्वजन्मान्तरोत्पन्नैरेतज्जन्मकृतैरपि ॥ १३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वटसावित्रीव्रत-कथा

सनत्कुमार उवाच

कुलस्त्रीणां व्रतं ब्रूहि महाभाग्यं तथैव च।
अवैधव्यकरं स्त्रीणां पुत्रपौत्रप्रदायकम् ॥ १ ॥

ईश्वर उवाच

आसीन्मद्रेषु धर्मात्मा ज्ञानी परमधार्मिकः।
नाम्ना चाश्वपतिर्वीरो वेदवेदाङ्गपारगः ॥ २ ॥
अनपत्यो महाबाहुः सर्वैश्वर्यसमन्वितः।
सपत्नीकस्तपस्तेपे समाराधयते नृपः ॥ ३ ॥
सावित्रीं च प्रसावित्रीं जपन्नास्ते महामनाः।
जुहोति चैव सावित्रीं भक्त्या परमया युतः ॥ ४ ॥
ततस्तुष्टा तु सावित्री सा देवी द्विजसत्तम।
सविग्रहवती देवी तस्य दर्शनमागता ॥ ५ ॥
भूर्भुवः स्वरवन्त्येषा साक्षसूत्रकमण्डलुः।
तां तु दृष्ट्वा जगद्वन्द्यां सावित्रीं च द्विजोत्तम ॥ ६ ॥
प्रणिपत्य नृपो भक्त्या प्रहृष्टेनान्तरात्मना।
तं दृष्ट्वा पतितं भूमौ तुष्टा देवी जगाद ह ॥ ७ ॥

सावित्र्युवाच

तुष्टाहं तव राजेन्द्र वरं वरय सुव्रत।
एवमुक्तस्तया राजा प्रसन्नां तामुवाच ह ॥ ८ ॥

राजोवाच

अनपत्यो ह्यहं देवि पुत्रमिच्छामि शोभनम्।
नान्यं वृणोमि सावित्रि पुत्रमेव जगन्मये ॥ ९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यदस्ति समग्रं मे क्षितौ यच्चापि दुर्लभम्।
प्रसादात् तव देवेशि तत् सर्वं विद्यते गृहे ॥ १० ॥
एवमुक्ता तु सा देवी प्रत्युवाच नराधिपम्।

सावित्र्युवाच

पुत्रस्ते नास्ति राजेन्द्र कन्यैका ते भविष्यति ॥ ११ ॥
कुलद्वयं तु सा राजन्नुद्धरिष्यति भामिनी।
मन्नाम्ना राजशार्दूल तस्या नाम भविष्यति ॥ १२ ॥
इत्युक्त्वा तं मुनिश्रेष्ठ राजानं ब्रह्मणः प्रिया।
अन्तर्धानं गता देवी संतुष्टोऽसौ महीपतिः ॥ १३ ॥
ततः कतिपयाहोभिस्तस्य राज्ञी महीभुजः।
ससत्त्वा समजायेत पूर्णे काले सुषाव ह ॥ १४ ॥
सावित्र्या तुष्टया दत्ता सावित्र्या जप्तया तथा।
सावित्री तेन वरदा तस्या नाम बभूव ह ॥ १५ ॥
राजते देवगर्भाभा कन्या कमललोचना।
ववृधे सा मुनिश्रेष्ठ चन्द्रलेखेव चाम्बरे ॥ १६ ॥
सावित्री ब्रह्मणो वै सा श्रीरिवायतलोचना।
तां दृष्ट्वा हेमगर्भाभां राजा चिन्तामुपेयिवान् ॥ १७ ॥
आयाच्यमानां च वरै रूपेणाप्रतिमां भुवि।
तस्या रूपेण ते सर्वे संनिरुद्धा महीभुजः ॥ १८ ॥
ततश्च राजा आहूय उवाच कमलेक्षणाम्।
पुत्रि प्रदानकालस्ते न च याचन्ति केचन ॥ १९ ॥
स्वयं वरय हृद्यं ते पतिं गुणसमन्वितम्।
मनःप्रह्लादनकरं शीलेनाभिजनेन च ॥ २० ॥
इत्युक्त्वा तां च राजेन्द्रो वृद्धामात्यैः सहैव च।
वस्त्रालंकारसहितां धनरत्नैः समन्विताम् ॥ २१ ॥
विसृज्य च क्षणं तत्र यावत् तिष्ठति भूमिपः।
तावत् तत्र समागच्छन्नारदो भगवानृषिः ॥ २२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपूजयत् ततो राजा अर्घ्यपाद्येन तं मुनिम्।
आसने च सुखासीनः पूजितस्तेन भूभुजा ॥ २३ ॥
पूजयित्वा मुनिं राजा प्रोवाचेदं द्विजोत्तमम्।
पावितोऽहं त्वया विप्र दर्शनेनाद्य नारद ॥ २४ ॥
यावदेवं वदेद् राजा तावत् सा कमलेक्षणा।
आश्रमादागता देवी वृद्धामात्यैः समन्विता ॥ २५ ॥
अभिवन्द्य पितुः पादौ ववन्दे सा मुनिं ततः।
नारदेन तु दृष्टा सा स तु प्रोवाच भूमिपम् ॥ २६ ॥

नारद उवाच

कन्यां च देवगर्भाभां किमर्थं न प्रयच्छसि।
वराय त्वं महाबाहो वरयोग्यां हि सुन्दरीम् ॥ २७ ॥
एवमुक्तस्तदा तेन मुनिना नृपसत्तमः।
उवाच तं मुनिं वाक्यमनेनार्थेन प्रेषिता ॥ २८ ॥
आगतेयं विशालाक्षी मया सम्प्रेषिता सती।
अनया च वृतो भर्ता पृच्छ त्वं मुनिसत्तम ॥ २९ ॥
सा पृष्टा तेन मुनिना तस्मै चाचष्ट भामिनी।

सावित्र्युवाच

आश्रमे सत्यवान् नाम द्युमत्सेनसुतो मुने।
भर्तृत्वेन मया विप्र वृतोऽसौ राजनन्दनः ॥ ३० ॥

नारद उवाच

कष्टं कृतं महाराज दुहित्रा तव सुव्रत।
अजानन्त्या वृतो भर्ता गुणवानिति विश्रुतः ॥ ३१ ॥
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते।
स्वयं सत्यं प्रभाषेत सत्यवानिति तेन सः ॥ ३२ ॥
तथा चाश्वाः प्रियास्तस्य अश्वैः क्रीडति मृण्मयैः।
चित्रेऽपि विलिखत्यश्वांश्चित्राश्वस्तेन चोच्यते ॥ ३३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रूपवान् गुणवांश्चैव सर्वशास्त्रविशारदः ।
न तस्य सदृशो लोके विद्यते चेह मानवः ॥ ३४ ॥
सर्वैर्गुणैश्च सम्पन्नो रत्नैरिव महार्णवः ॥ ३५ ॥
एको दोषो महानस्य गुणानावृत्य तिष्ठति ।
संवत्सरेण क्षीणायुर्देहत्यागं करिष्यति ॥ ३६ ॥

अश्वपतिरुवाच

अन्यं वरय भद्रं ते वरं सावित्रि गम्यताम् ।
विवाहस्य तु कालोऽयं वर्तते शुभलक्षणे ॥ ३७ ॥

सावित्र्युवाच

नान्यमिच्छाम्यहं तात मनसापि वरं प्रभो ।
यो मया च वृतो भर्ता स मे नान्यो भविष्यति ॥ ३८ ॥
विचिन्त्य मनसा पूर्वं वाचा पश्चात् समुच्चरेत् ।
क्रियते च ततः पश्चाच्छुभं वा यदि वाशुभम् ॥ ३९ ॥
तस्मात् पुमांसं मनसा कथं चान्यं वृणोम्यहम् ।
सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः ।
सकृत् कन्या प्रदीयेत त्रीण्येतानि सकृत् सकृत् ॥ ४० ॥
इति मत्वा न मे बुद्धिर्विचलेच्च कथंचन ।
सगुणो निर्गुणो वापि मूर्खः पण्डित एव च ॥ ४१ ॥
दीर्घायुरथवाल्पायुः स वै भर्ता मम प्रभो ।
नान्यं वृणोमि भर्तारं यदि वा स्याच्छचीपतिः ॥ ४२ ॥
इति मत्वा त्वया तात यत् कर्तव्यं वदस्व तत् ।

नारद उवाच

स्थिरा बुद्धिश्च राजेन्द्र सावित्र्याः सत्यवान् प्रति ॥ ४३ ॥
त्वरयस्व विवाहाय भर्त्रा सह कुरु त्विमाम् ।

ईश्वर उवाच

निश्चितां तु मतिं ज्ञात्वा स्थिरां बुद्धिं च निश्चलाम् ॥ ४४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सावित्र्याश्च महाराजः प्रतस्थेऽसौ वनं प्रति।
गृहीत्वा तु धनं राजा द्युमत्सेनस्य संनिधौ ॥ ४५ ॥
स्वल्पानुगो महाराजो वृद्धामात्यैः समन्वितः।
नारदस्तु ततः खे वै तत्रैवान्तरधीयत ॥ ४६ ॥
स गत्वा राजशार्दूलो द्युमत्सेनेन संगतः।
वृद्धश्चान्धश्च राजासौ वृक्षमूलमुपाश्रितः ॥ ४७ ॥
सावित्र्यश्वपती राजा पादौ जग्राह वीर्यवान्।
स्वनाम च समुच्चार्य तस्थौ तस्य समीपतः ॥ ४८ ॥
उवाच राजा तं भूपं किमागमनकारणम्।
पूजयित्वार्घ्यदानेन वन्यमूलफलैश्च सः ॥ ४९ ॥
ततः पप्रच्छ कुशलं स राजा मुनिसत्तम।

अश्वपतिरुवाच

कुशलं दर्शनेनाद्य तव राजन् ममाद्य वै ॥ ५० ॥
दुहिता मम सावित्री तव पुत्रमभीप्सति।
भर्तारं राजशार्दूल प्राप्नोत्वियमनिन्दिता ॥ ५१ ॥
मनसा काङ्क्षितं पूर्वं भर्तारमनया विभो।
आवयोश्चैव सम्बन्धो भवत्वद्य ममेप्सितः ॥ ५२ ॥

द्युमत्सेन उवाच

वृद्धश्चान्धश्च राजेन्द्र फलमूलाशनोऽस्म्यहम्।
राज्याच्च्युतश्च मे पुत्रो वन्येनाद्य स जीवति ॥ ५३ ॥
सा कथं सहते दुःखं दुहिता तव कानने।
अनभिज्ञा च दुःखानामित्यहं नाभिकाङ्क्षये ॥ ५४ ॥

अश्वपतिरुवाच

अनया च वृतो भर्ता जानन्त्या राजसत्तम।
अनेन सहवासस्तु तव पुत्रेण मानद ॥ ५५ ॥
स्वर्गतुल्यो महाराज भविष्यति न संशयः ॥ ५६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवमुक्तस्तदा तेन राज्ञा राजर्षिसत्तमः ।
तथेति स प्रतिज्ञाय चकारोद्वाहमुत्तमम् ॥ ५७ ॥
कृत्वा विवाहं राजेन्द्रं सम्पूज्य विविधैर्धनैः ।
अभिवाद्य द्युमत्सेनं जगाम नगरीं प्रति ॥ ५८ ॥
सावित्री तु पतिं लब्ध्वा इन्द्रं प्राप्य शची यथा ।
सत्यवानपि ब्रह्मर्षे तथा पत्न्याभिनन्दितः ॥ ५९ ॥
क्रीडते तद्वनोद्देशे पौलोम्या मघवानिव ।
नारदस्य च तद् वाक्यं हृदयेन मनस्विनी ॥ ६० ॥
वहन्ती नियमं चक्रे व्रतस्यास्य च भामिनी ।
गणयन्ती दिनान्येव न लेभे तोषमुत्तमम् ॥ ६१ ॥
ज्ञात्वा तद् दिवसं विप्र भर्तुर्मरणकारणम् ।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिराभवत् ॥ ६२ ॥
ततस्त्रिरात्रं निर्वृत्य संतर्प्य पितृदेवताः ।
श्वश्रूश्वशुरयोः पादौ ववन्दे चारुहासिनी ॥ ६३ ॥
कुठारं परिगृह्याथ कठिनं चैव सुव्रत ।
प्रतस्थे स वनायैव सावित्री वाक्यमब्रवीत् ॥ ६४ ॥

सावित्र्युवाच

न गन्तव्यं वनं त्वद्य मम वाक्येन मानद ।
अथवा गम्यते साधो मया सह वनं व्रज ॥ ६५ ॥
संवत्सरं भवेत् पूर्णमाश्रमेऽस्मिन् मम प्रभो ।
तद् वनं द्रष्टुमिच्छामि प्रसादं कुरु मे विभो ॥ ६६ ॥

सत्यवानुवाच

नाहं स्वतन्त्रः सुश्रोणि पृच्छस्व पितरौ मम ।
ताभ्यां प्रस्थापिता गच्छ मया सह शुचिस्मिते ॥ ६७ ॥
एवमुक्ता तदा तेन भर्त्रा सा कमलेक्षणा ।
श्वश्रूश्वशुरयोः पादावभिवाद्येदमब्रवीत् ॥ ६८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वनं द्रष्टुमभीच्छेयमाज्ञां मह्यं प्रदीयताम्।
भर्त्रा सह वनं गन्तुमेतत् त्वरयते मनः ॥ ६९ ॥
तस्यास्तद् वचनं श्रुत्वा द्युमत्सेनो ब्रवीदिदम्।
व्रतं कृतं त्वया भद्रे पारणं कुरु सुव्रते ॥ ७० ॥
पारणान्ते ततो भीरु वनं गन्तुं त्वमर्हसि ॥ ७१ ॥

सावित्र्युवाच

नियमश्च कृतोऽस्माभी रात्रौ चन्द्रोदये सति।
जाते मया प्रकर्तव्यं भोजनं तात मे शृणु ॥ ७२ ॥
वनदर्शनकामोऽस्ति भर्त्रा सह ममाद्य वै।
न मे तत्र भवेद् ग्लानिर्भर्त्रा सह नराधिप ॥ ७३ ॥
इत्युक्तस्तु तया राजा द्युमत्सेनो महीपतिः।
यत् तेऽभिलषितं पुत्रि तत् कुरुष्व सुमध्यमे ॥ ७४ ॥
नमस्कृत्वा तु सावित्री श्वश्रूं च श्वशुरं तथा।
सहिता सा जगामाथ तेन सत्यव्रता मुने ॥ ७५ ॥
विलोकयन्ती भर्तारं प्राप्तकालं मनस्विनी।
वनं च फलितं दृष्ट्वा पुष्पितद्रुमसंकुलम् ॥ ७६ ॥
द्रुमाणां चैव नामानि मृगाणां चैव भामिनी।
पश्यन्ती मृगयूथानि हृदयेन प्रवेपती ॥ ७७ ॥
तत्र गत्वा सत्यवान् वै फलान्यादाय सत्वरम्।
काष्ठानि च समादाय बबन्ध भारकं तदा।
कठिनं पूरयामास कृत्वा वृक्षावलम्बनम् ॥ ७८ ॥
वटवृक्षस्य सा साध्वी उपविष्टा महासती।
काष्ठं पाटयतस्तस्य जाता शिरसि वेदना ॥ ७९ ॥
ग्लानिश्च महती जाता गात्राणां वेपथुस्तदा।
आदाय वृक्षसामीप्यं सावित्रीमिदमब्रवीत् ॥ ८० ॥
मम गात्रेऽतिकम्पश्च जाता शिरसि वेदना।
कण्टकैर्भिद्यते भद्रे शिरो मे शूलसम्मितैः ॥ ८१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सङ्गे तव सुश्रोणि स्वप्तुमिच्छामि सुव्रते ।
अभिज्ञा सा विशालाक्षी तस्य मृत्योर्मनस्विनी ॥ ८२ ॥
प्राप्तं कालं मन्यमाना तस्थौ तत्रैव भामिनी ।
सत्यवानपि सुप्तस्तु कृत्वोत्सङ्गे शिरस्तदा ॥ ८३ ॥
तावत् तत्र समागच्छत् पुरुषः कृष्णपिङ्गलः ।
जाज्वल्यमानो वपुषा ददर्शामुं च भामिनी ॥ ८४ ॥
उवाच वाक्यं वाक्यज्ञा कस्त्वं लोकभयंकरः ।
नाहं धर्षयितुं शक्या पुरुषेणापि केनचित् ॥ ८५ ॥
इत्युक्तः प्रत्युवाचेदं यमो लोकभयंकरः ।
क्षीणायुस्तु वरारोहे तव भर्ता मनस्विनि ॥ ८६ ॥
नेष्याम्येनमहं बद्ध्वा विद्ध्येतन्मे चिकीर्षितम् ॥ ८७ ॥

सावित्र्युवाच

श्रूयते भगवन् दूतास्तवागच्छन्ति मानवान् ।
नेतुं किल भवान् कस्मादागतोऽसि स्वयं प्रभो ॥ ८८ ॥
इत्युक्तः पितृराजस्तां भगवान् स्वचिकीर्षितम् ।
यथावत् सर्वमाख्यातुं तत् प्रियार्थं प्रचक्रमे ॥ ८९ ॥
अयं च धर्मसंयुक्तो रूपवान् गुणसागरः ।
नार्हो मत्पुरुषैर्नेतुमतोऽस्मि स्वयमागतः ॥ ९० ॥
ततः सत्यवतः कायात् पाशबद्धं वशं गतम् ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ ९१ ॥
निर्विचेष्टं शरीरं तद् बभूवाप्रियदर्शनम् ।
यमस्तु तं ततो बद्ध्वा प्रयातो दक्षिणामुखः ॥ ९२ ॥
सावित्री चापि दुःखार्ता यममेवान्वगच्छत ।
नियमव्रतसंसिद्धा महाभागा पतिव्रता ॥ ९३ ॥

यम उवाच

निवर्त गच्छ सावित्रि कुरुष्वास्यौर्ध्वदेहिकम् ।
कृतं भर्तुस्त्वयानृण्यं यावद् गम्यं गतं त्वया ॥ ९४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सावित्र्युवाच

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति।
मयापि तत्र गन्तव्यमेष धर्मः सनातनः ॥ ९५ ॥
तपसा गुरुभक्त्या च भर्तुः स्नेहाद् व्रतेन च।
तव चैव प्रसादेन न मे प्रतिहता गतिः ॥ ९६ ॥
प्राहुः साप्तपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः।
मित्रतां च पुरस्कृत्य किंचिद् वक्ष्यामि तच्छृणु ॥ ९७ ॥
नानात्मवन्तस्तु वने चरन्ति
धर्मं च वासं च परिश्रमं च।
विज्ञानतो धर्ममुदाहरन्ति
तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ ९८ ॥
एकस्य धर्मेण सतां मतेन
सर्वे स्म तं मार्गमनुप्रपन्नाः।
मा वै द्वितीयं मा तृतीयं च वाञ्छे
तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ ९९ ॥

यम उवाच

निवर्त तुष्टोऽस्मि त्वयानया गिरा
स्वराक्षरव्यञ्जनहेतुयुक्तया।
वरं वृणीष्वेह विनास्य जीवितं
ददामि ते सर्वमनिन्दिते वरम् ॥ १०० ॥

सावित्र्युवाच

च्युतः स्वराज्याद् वनवासमाश्रितो
विनष्टचक्षुः श्वशुरो ममाश्रमे।
स लब्धचक्षुर्बलवान् भवेन्नृप-
स्तव प्रसादाज्ज्वलनार्कसंनिभः ॥ १०१ ॥

यम उवाच

ददानि तेऽहं तमनिन्दिते वरं
यथा त्वयोक्तं भविता च तत् तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तवाध्वना ग्लानिमिवोपलक्षये
निवर्त गच्छस्व न ते श्रमो भवेत् ।। १०२ ।।

सावित्र्युवाच

कुतः श्रमो भर्तृसमीपतो हि मे
यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः
सुरेश भूयश्च वचो निबोध मे ।। १०३ ।।
सतां सकृत् सङ्गतमीप्सितं परं
ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण सङ्गतं
ततः सतां संनिवसेत् समागमे ।। १०४ ।।

यम उवाच

मनोऽनुकूलं बुधबुद्धिवर्धनं
त्वया यदुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतो हि जीवितं
वरं द्वितीयं वरयस्व भामिनि ।। १०५ ।।

सावित्र्युवाच

हृतं पुरा मे श्वशुरस्य धीमतः
स्वमेव राज्यं लभतां स पार्थिवः ।
जह्यात् स्वधर्मान्न च मे गुरुर्यथा
द्वितीयमेतद् वरयामि ते वरम् ।। १०६ ।।

यम उवाच

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरा-
न्न च स्वधर्मात् परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे
निवर्त गच्छस्व न ते श्रमो भवेत् ।। १०७ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

****

सावित्र्युवाच

प्रजास्त्वयैता नियमेन संयता
नियम्य चैता नयसे निकामया।
ततो यमत्वं तव देव विश्रुतं
निबोध चेमां गिरमीरितां मया ॥ १०८ ॥
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ १०९ ॥
एवं प्रायश्च लोकोऽयं मनुष्याः शक्तिपेशलाः।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते ॥ ११० ॥

यम उवाच

पिपासितस्येव भवेद् यथा पय-
स्तथा त्वया वाक्यमिदं समीरितम्।
विना पुनः सत्यवतोऽस्य जीवितं
वरं वृणीष्वेह शुभे यदिच्छसि ॥ १११ ॥

सावित्र्युवाच

ममानपत्यः पृथिवीपतिः पिता
भवेत् पितुः पुत्रशतं तथौरसम्।
कुलस्य संतानकरं च यद् भवेत्
तृतीयमेतद् वरयामि ते वरम् ॥ ११२ ॥

यम उवाच

कुलस्य संतानकरं सुवर्चसं
शतं सुतानां पितुरस्तु ते शुभे।
कृतेन कामेन नराधिपात्मजे
निवर्त दूरं हि पथस्त्वमागता ॥ ११३ ॥

सावित्र्युवाच

न दूरमेतन्मम भर्तृसंनिधौ
मनो हि मे दूरतरं प्रधावति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ व्रजन्नेव गिरं समुद्यतां
मयोच्यमानां शृणु भूय एव च ॥ ११४ ॥
विवस्वतस्त्वं तनयः प्रतापवां-
स्ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्मेण चरन्ति ताः प्रजा-
स्ततस्तवेहेश्वर धर्मराजता ॥ ११५ ॥
आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः ।
तस्मात् सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥ ११६ ॥
सौहृदात् सर्वभूतानां विश्वासो नाम जायते ।
तस्मात् सत्सु विशेषेण विश्वासं कुरुते जनः ॥ ११७ ॥

यम उवाच

उदाहृतं ते वचनं यदङ्गने
शुभं न तादृक् त्वदृते श्रुतं मया ।
अनेन तुष्टोऽस्मि विनास्य जीवितं
वरं चतुर्थं वरयस्व गच्छ च ॥ ११८ ॥

सावित्र्युवाच

ममात्मजं सत्यवतस्तथौरसं
भवेदुभाभ्यामिह यत् कुलोद्भवम् ।
शतं सुतानां बलवीर्यशालिना-
मिमं चतुर्थं वरयामि ते वरम् ॥ ११९ ॥

यम उवाच

शतं सुतानां बलवीर्यशालिनां
भविष्यति प्रीतिकरं तवाबले ।
परिश्रमस्ते न भवेन्नृपात्मजे
निवर्त दूरं हि पथस्त्वमागता ॥ १२० ॥

सावित्र्युवाच

सतां सदा शाश्वतधर्मवृत्तिः
सन्तो न सीदन्ति न च व्यथन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सतां सद्भिर्नाफलः संगमोऽस्ति
सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥ १२१ ॥
सन्तो हि सत्येन नयन्ति सूर्यं
सन्तो भूमिं तपसा धारयन्ति।
सन्तो गतिर्भूतभव्यस्य राजन्
सतां मध्ये नावसीदन्ति सन्तः ॥ १२२ ॥
आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम्।
सन्तः परार्थं कुर्वाणा नावेक्षन्ते परस्परम् ॥ १२३ ॥
न च प्रसादः सत्पुरुषेषु मोघो
न चाप्यर्थो नश्यति नापि मानः।
यस्मादेतन्नियतं सत्सु नित्यं
तस्मात् सन्तो रक्षितारो भवन्ति ॥ १२४ ॥

यम उवाच

यथा यथा भाषसि धर्मसंहितं
मनोऽनुकूलं सुपदं महार्थवत्।
तथा तथा मे त्वयि भक्तिरुत्तमा
वरं वृणीष्वाप्रतिमं पतिव्रते ॥ १२५ ॥

सावित्र्युवाच

न तेऽपवर्गः सुकृताद् विना कृत-
स्तथा यथान्येषु वरेषु मानद।
वरं वृणे जीवतु सत्यवानयं
यथा मृता ह्येवमहं पतिं विना ॥ १२६ ॥
न कामये भर्तृविनाकृता सुखं
न कामये भर्तृविनाकृता दिवम्।
न कामये भर्तृविनाकृता श्रियं
न भर्तृहीना व्यवसामि जीवितुम् ॥ १२७ ॥
वरातिसर्गः शतपुत्रता मम
त्वयैव दत्तो ह्रियते च मे पतिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वरं वृणे जीवतु सत्यवानयं
तवैव सत्यं वचनं भविष्यति ॥ १२८ ॥

मार्कण्डेय उवाच

तथेत्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमः ।
धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥ १२९ ॥
एष भद्रे मया मुक्तो भर्ता ते कुलनन्दिनि ।
अरोगस्तव नेयश्च सिद्धार्थः स भविष्यति ॥ १३० ॥
चतुर्वर्षशतायुश्च त्वया सार्धमवाप्स्यति ॥ १३१ ॥
सा गता वटसामीप्यं कृत्वोत्संगे शिरस्ततः ।
प्रबुद्धस्तु ततो ब्रह्मन् सत्यवानिदमब्रवीत् ॥ १३२ ॥
मया स्वप्नो वरारोहे दृष्टोऽद्यैव च भामिनि ।
तत् सर्वं कथितं तस्या यद् वृत्तं सर्वमेव तत् ॥ १३३ ॥
तया च कथितः सर्वः संवादश्च यमेन हि ।
अस्तंगते ततः सूर्ये द्युमत्सेनो महीपतिः ॥ १३४ ॥
पुत्रस्यागमनाकाङ्क्षी इतश्चेतश्च धावति ।
आश्रमादाश्रमं गच्छन् पुत्रदर्शनकाङ्क्षया ॥ १३५ ॥
आवयोरन्धयोर्यष्टिः क्व गतोऽसि विनावयोः ।
एवं स विविधं क्रोशन् सपत्नीको महीपतिः ॥ १३६ ॥
चकार दुःखसंतप्तः पुत्रपुत्रेति चासकृत् ।
अकस्मादेव राजेन्द्रो लब्धचक्षुर्बभूव ह ॥ १३७ ॥
तद् दृष्ट्वा परमाश्चर्यं चक्षुःप्राप्तिं द्विजोत्तमाः ।
सान्त्वपूर्वं तदा वाक्यमूचुस्ते तापसा भृशम् ॥ १३८ ॥
चक्षुःप्राप्त्या महाराज सूचितं ते महीपते ।
पुत्रेण च समं योगं प्राप्स्यसे नृपसत्तम ॥ १३९ ॥

ईश्वर उवाच

यावदेवं वदन्त्येते तापसा द्विजसत्तमाः ।
सावित्रीसहितः प्राप्तः सत्यवान् द्विजसत्तम ॥ १४० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नमस्कृत्य द्विजान् सर्वान् मातरं पितरं तथा ।
सावित्री च ततो ब्रह्मन् ववन्दे चरणौ मुदा ॥ १४१ ॥
श्वश्रूश्वशुरयोस्तां तु पप्रच्छुर्मुनयस्तदा ।

मुनय ऊचुः

वद सावित्रि जानासि कारणं वरवर्णिनि ।
वृद्धस्य चक्षुषः प्राप्तेः श्वशुरस्य शुभानने ॥ १४२ ॥

सावित्र्युवाच

न जानामि मुनिश्रेष्ठाश्चक्षुषः प्राप्तिकारणम् ।
चिरं सुप्तस्तु मे भर्ता तेन कालव्यतिक्रमः ॥ १४३ ॥

सत्यवानुवाच

अस्याः प्रभावात् संजातं दृश्यते कारणं न च ।
तत् सर्वं विद्यते विप्राः सावित्र्यास्तपसः फलम् ॥ १४४ ॥
व्रतस्यैव तु माहात्म्यं दृष्टमेतन्मयाधुना ॥ १४५ ॥

ईश्वर उवाच

एवं तु वदतस्तस्य तदा सत्यवतो मुने ।
पौराः समागतास्तस्य ह्याचख्युर्नृपतेर्हितम् ॥ १४६ ॥

पौरा ऊचुः

येन राज्यं बलाद् राजन् हृतं क्रूरेण मन्त्रिणा ।
अमात्येन हतः सोऽपि इतीव वयमागताः ॥ १४७ ॥
उत्तिष्ठ राजशार्दूल स्वं राज्यं पालय प्रभो ।
अभिषिच्यस्व राजेन्द्र पुरे मन्त्रिपुरोहितैः ॥ १४८ ॥

ईश्वर उवाच

तच्छ्रुत्वा राजशार्दूलः स्वपुरं जनसंवृतः ।
पितृपैतामहं राज्यं सम्प्राप्य मुदमन्वभूत् ॥ १४९ ॥
सावित्री सत्यवांश्चैव परां मुदमवापतुः ।
जनयामास पुत्राणां शतं सा बाहुशालिनाम् ॥ १५० ॥
व्रतस्यैव तु माहात्म्यात् तस्याः पितुरजायत ।
पुत्राणां च शतं ब्रह्मन् [illegible] [illegible] तथा ॥ १५१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

एतत् ते कथितं सर्वं व्रतमाहात्म्यमुत्तमम्।
क्षीणायुर्जीवते भर्ता व्रतस्यास्य प्रभावतः ॥ १५२ ॥
कर्त्तव्यं सर्वनारीभिरवैधव्यफलप्रदम्।

सनत्कुमार उवाच

विधानं ब्रूहि देवेश व्रतस्यास्य च त्र्यम्बक।
क्रियते विधिना केन स्त्रीभिस्त्रिपुरसूदन ॥ १५३ ॥

ईश्वर उवाच

वर्षैकं नियमं कृत्वा एकभक्तेन मानद।
नक्ताहारेण वा विप्र भुक्तिं त्यक्त्वा द्विजर्षभ ॥ १५४ ॥
त्रिदिनं लङ्घयित्वा च चतुर्थे दिवसे शुभे।
चन्द्रायार्घ्यं प्रदत्त्वा च पूजयित्वा सुवासिनीम् ॥ १५५ ॥
सावित्रीं च प्रसावित्रीं गन्धपुष्पैः प्रपूज्य च।
मिथुनानि यथाशक्त्या भोजयित्वा यथासुखम् ॥ १५६ ॥
भोक्ष्येऽहं तु जगद्धात्रि निर्विघ्नं कुरु मे शुभे।
दिनं दिनं प्रतिश्रेष्ठं कुर्यान्न्यग्रोधसेचनम् ॥ १५७ ॥
कृत्वा वंशमये पात्रे वालुकाप्रस्थमेव च।
सप्तधान्यभृतं पात्रं प्रस्थैकेन द्विजोत्तम ॥ १५८ ॥
कारयेन्मुनिशार्दूल वस्त्रयुग्मेन वेष्टयेत् ॥ १५९ ॥
तस्योपरि न्यसेद् देवीं सावित्रीं ब्रह्मणा सह।
सावित्री सत्यवांश्चैव कार्यौ स्वर्णमयौ शुभौ ॥ १६० ॥
पिटकं च कुठारं च कृत्वा रौप्यमयं द्विज।
फलैः कालोद्भवैर्देवीं पूजयेद् ब्रह्मणः प्रियाम् ॥ १६१ ॥
हरिद्रारञ्जितैश्चैव कण्ठसूत्रैः समर्चयेत्।
सतीनां कण्ठसूत्राणि त्रिदिनं प्रतिदापयेत् ॥ १६२ ॥
पक्वान्नानि च देयानि नित्यमेव द्विजोत्तम।
माहात्म्यं चैव सावित्र्याः श्रोतव्यं मुनिसत्तम ॥ १६३ ॥
पुराणश्रवणं कार्यं सतीनां चरितं तथा।
पूजयेच्च तथा नित्यं मन्त्रेणानेन सुव्रत ॥ १६४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'सावित्री च प्रसावित्री सततं ब्रह्मणः प्रिया ।
पूज्यसे हूयसे देवि द्विजैर्मुनिगणैः सदा ॥ १६५ ॥
त्रिसन्ध्यं देवि भूतानां वन्दिता त्वं जगन्मये ।
मया दत्तामिमां पूजां प्रतिगृह्ण नमोऽस्तु ते ॥ १६६ ॥
सावित्री त्वं प्रसावित्री द्विधा भूतासि शोभने ।
जगत्त्रयस्थिता देवि त्रिसन्ध्यं च तथानघे ॥ १६७ ॥
श्रेष्ठे देवि त्रिलोके च त्रेताग्नौ त्वं महेश्वरि ।
व्यापितः सकलो लोकश्चातो मां पाहि सर्वदा ॥ १६८ ॥
रूपं देहि यशो देहि सौभाग्यं देहि मे शुभे ।
पुत्रान् देहि धनं देहि सर्वदा जन्मजन्मसु ॥ १६९ ॥
यथा ते न वियोगोऽस्ति भर्त्रा सह सुरेश्वरि ।
तथा मम महाभागे कुरु त्वं जन्मजन्मनि' ॥ १७० ॥
एवं सम्पूजयेद् देवीं कमलासनसंस्थिताम् ।
एवं दिनत्रयं नीत्वा चतुर्थेऽहनि सत्तम ॥ १७१ ॥
मिथुनानि च सम्भोज्य षोडशैव द्विजोत्तम ।
पूजयेद् वस्त्रदानैश्च भूषणैश्च द्विजोत्तम ॥ १७२ ॥
अर्चयित्वा तथाऽऽचार्यं सपत्नीकं सुसम्मतम् ।
तस्मै संकल्पितं सर्वं हेमसावित्रिसंयुतम् ॥ १७३ ॥
मन्त्रेणानेन दातव्यं द्विजमुख्याय सुव्रत ।
सावित्रीं कल्पविदुषे प्रणिपत्य तथा मुने ॥ १७४ ॥
'सावित्रीं जगतां माता सावित्री जगतः पिता ।
मया दत्ता च सावित्री ब्राह्मण प्रतिगृह्यताम् ॥ १७५ ॥
अवैधव्यं च मे नित्यं भूयाज्जन्मनि जन्मनि' ।
मृता च वसते लोके ब्रह्मणः पतिना सह ।
तत्रैव च चिरं कालं भुङ्क्ते भोगाननुत्तमान् ॥ १७६ ॥

इति श्रीहेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ व्रतखण्डे स्कन्दमहापुराणे
वटसावित्रीव्रतकथा समाप्ता ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मङ्गलागौरीव्रत-कथा

युधिष्ठिर उवाच

नन्दनन्दन गोविन्द शृण्वतो बहुलाः कथाः ।
श्रुती ममोत्के पुत्रायुष्करं श्रोतुं मम व्रतम् ॥ १ ॥

श्रीकृष्ण उवाच

अवैधव्यकरं वक्ष्ये व्रतं चारिनिषूदन ।
शृणु त्वं सावधानः सन् कथां वक्ष्ये पुरातनीम् ॥ २ ॥
कुण्डिनं नाम नगरं ख्यातस्तत्र द्विजप्रियः ।
आसीद् वणिग् धर्मपालो नाम्ना बहुधनोऽपि सः ॥ ३ ॥
सपत्नीको ह्यपुत्रोऽसौ नास्तीति व्याकुलो हृदि ।
तस्य गेहे भस्मलिप्तो देहे रुद्राक्षधारकः ॥ ४ ॥
जटिलो भिक्षुको नित्यमागच्छन् प्रियदर्शनः ।
अन्नं नाङ्गीचकारासाविति दृष्ट्वाबलावदत् ॥ ५ ॥
स्वामिन्नयं सदायाति भिक्षुको जटिलो गृहे ।
न स्वीकरोत्यस्मदन्नमिति दृष्ट्वा ममाधिकम् ॥ ६ ॥
दुःखं प्रजायते नित्यं श्रुत्वा भार्यावचोऽब्रवीत् ।

धर्मपाल उवाच

प्रिये कदाचिद् गुप्ता त्वं ससुवर्णाङ्गणे भव ॥ ७ ॥
यदा भिक्षार्थमायाति भिक्षोर्वस्त्रान्तरे त्वया ।
तदा तस्य प्रदेयानि सुवर्णानि प्रियेऽनघे ॥ ८ ॥
अनन्तरं तस्य भार्याचीकरत् स्वामिनोदितम् ।
जटिलेन तु सा शप्तापत्यं ते न भविष्यति ॥ ९ ॥
श्रुत्वा भिक्षोरिदं वाक्यं दुःखिता तमुवाच ह ।
स्वामिन् शप्ता त्वया पापा शापादुद्धर सम्प्रति ॥ १० ॥
इत्युक्त्वा तस्य चरणौ ववन्दे दीनभाषिणी ।

जटिल उवाच

भर्तुः समीपे वक्तव्यं त्वया पुत्रि ममाज्ञया ॥ ११ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

****

नीलवस्त्रः समारुह्य नीलाश्वं गच्छ काननम् ।
खननं तत्र कर्त्तव्यं यत्राश्वस्ते स्खलिष्यति ॥ १२ ॥
रम्यं पक्षिभिरायुक्तं मृगसङ्घद्रुमाकुलम् ।
सुवर्णरचितं रत्नमाणिक्यादिविभूषितम् ॥ १३ ॥
नानापुष्पैः समायुक्तं दृश्यं देवालयं ततः ।
वर्तते तत्रभवती भवानी भक्तवत्सला ॥ १४ ॥
आराधय त्वं मनसा यथाविध्युद्धरिष्यति ।
त्वां भवानीति वचनं श्रुत्वा भिक्षोः सुखप्रदम् ॥ १५ ॥
ववन्दे तस्य चरणौ पुनः पुनररिंदम ।
तदैव काले जटिलस्त्वन्तर्भूतो बभूव सः ॥ १६ ॥
सावदत् पतिमत्रेहि शृणु भिक्षूक्तमादरात् ।
यथोक्तमवदद् भर्ता तच्छ्रुत्वा वाक्यमादरात् ॥ १७ ॥
नीलवस्त्रः समारुह्य नीलाश्वं प्रस्थितो वनम् ।
गच्छन् नानाविधान् वृक्षान् पथि पश्यन् भयाकुलः ॥ १८ ॥
मृगान् सिंहान् दन्दशूकान् पथि पश्यन् भयाकुलः ।
ददर्शासौ तडागं च बाहुल्येन विराजितम् ॥ १९ ॥
रक्तनीलोत्पलैश्चक्रवाकद्वन्द्वैश्च राजितम् ।
स्नानं चकार तत्रासौ तर्पणाद्यपि भूरिशः ॥ २० ॥
पुनरश्वं समारुह्य जगाम गहनं वनम् ।
स्खलितं वाजिनं पश्यन्नश्वादुत्तीर्य तत् क्षणम् ॥ २१ ॥
चखान पृथिवीं तत्र यावद् देवालयं मुदा ।
ददर्श च महास्थूलं देवालयमसौ युतम् ॥ २२ ॥
रत्नैर्मुक्ताफलैश्चैव माणिक्यैश्चापि सर्वतः ।
पूजयामास जटिलवाक्यं स्मृत्वातिविस्मितः ॥ २३ ॥
सुवर्णयुक्तवस्त्राणि चन्दनान्यक्षताञ्छुभान् ।
चम्पकादीनि पुष्पाणि धूपं दीपं विशेषतः ॥ २४ ॥
नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितम् ।
नानाशाकैः समायुक्तं सदुग्धघृतशार्करम् ॥ २५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नैवेद्यं करशुद्ध्यर्थं चन्दनं मलयाद्रिजम् ।
सम्पाद्य तुष्टहृदयः फलताम्बूलदक्षिणाः ॥ २६ ॥
श्रद्धया पूजयामास धर्मपालो महाधनः ।
जजाप मन्त्रान् गुप्तोऽसौ सगुणध्यानपूर्वकम् ॥ २७ ॥
देवी भक्तं समागत्य लोभयामास सादरम् ।
प्रसन्नावददत्रेयं पूजा सम्पादिता कथम् ॥ २८ ॥
येन सम्पादिता तस्मै ददामि वरमद्भुतम् ।
इति श्रुत्वा धर्मपालो देव्यग्रे प्राञ्जलिः स्थितः ॥ २९ ॥

भगवत्युवाच

धर्मपाल त्वया सम्यक् पूजा सम्पादितानघ ।
वरं याचय मद्भक्त ददामि बहुलं धनम् ॥ ३० ॥

धर्मपाल उवाच

बहुला धनसम्पत्तिर्वर्तते त्वत्प्रसादतः ।
अपत्यं प्राप्तुमिच्छामि पितॄणां तारकं शुभम् ॥ ३१ ॥
आयाति भिक्षुको गेहे गृह्णाति न मदन्नकम् ।
तेन मे बहुलं दुःखं सभार्यस्योपजायते ॥ ३२ ॥
इति दीनवचः श्रुत्वा देवी वचनमब्रवीत् ।

देव्युवाच

धर्मपालक तेऽदृष्टेऽपत्यं नास्ति सुखप्रदम् ॥ ३३ ॥
तथापि किं याचयसि कन्यां विगतभर्तृकाम् ।
पुत्रमल्पायुषं वाथाप्यन्धं दीर्घायुषं सुतम् ॥ ३४ ॥

धर्मपाल उवाच

पुत्रमल्पायुषं देहि तावता कृतकृत्यताम् ।
प्राप्नोमि चोद्धरिष्यामि पितॄंश्च मम घोरगान् ॥ ३५ ॥

देव्युवाच

मत्पार्श्वे वर्तमानस्य नाभावारुह्य शुण्डिनः ।
तत्पार्श्ववर्तिचूतस्य गृहीत्वा फलमद्भुतम् ॥ ३६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पत्न्यै देयं ततः पुत्रो भविष्यति न संशयः ॥ ३७ ॥
इति देवीवचः श्रुत्वा गत्वा तत्पार्श्वं एव च ।
नाभिं गजमुखस्याथारुह्य जग्राह मोहतः ॥ ३८ ॥
फलान्युत्तीर्य च ततः फलमेकं ददर्श सः ।
एवं पुनः पुनः कुर्वन् फलमेकं ददर्श सः ॥ ३९ ॥
क्षुब्धो गणपतिश्चाथ धर्मपालाय शप्तवान् ।
षोडशे वत्सरे प्राप्ते तेऽहिः पुत्रं दंशिष्यति ॥ ४० ॥
धर्मपालः फलं सम्यग् वस्त्रे बद्ध्वागमद् गृहम् ।
फलं पत्न्यै ददौ सापि भक्षयित्वा पतिव्रता ॥ ४१ ॥
गर्भं सा धारयामास पत्या सह सुसंगता ।
सम्पूर्णे नवमे मासे प्रासूत सुतमुत्तमम् ॥ ४२ ॥
जातकर्म चकारास्य पिता संतुष्टमानसः ।
षष्ठीपूजां चकारास्य षष्ठे तु दिवसे ततः ॥ ४३ ॥
द्वादशेऽहनि सम्प्राप्ते शिवनाम्नाऽऽजुहाव तम् ।
षष्ठे मासि चकारासावन्नप्राशनमद्भुतम् ॥ ४४ ॥
तृतीये वत्सरे चूडामष्टमेऽब्दे ह्यनुत्तमम् ।
कृत्वोपनयनं पार्थ विप्रोऽभूत् तुष्टमानसः ॥ ४५ ॥
दशमे वत्सरे प्राप्तेऽब्रवीद् भार्या पतिव्रता ।

भार्योवाच

बालकस्य विवाहोऽपि कर्तव्यः सुमुहूर्तके ॥ ४६ ॥

धर्मपाल उवाच

मया संकल्पितं काश्यां गमनं बालकस्य तत् ।
कृत्वा समायातु ततो विवाहोऽस्य भविष्यति ॥ ४७ ॥
पुत्रोऽसौ प्रेषितस्तेन श्यालकेन समन्वितः ।
वाराणस्यां प्रस्थितोऽसौ गृहीत्वा बहुलं धनम् ॥ ४८ ॥
कुर्वन्तौ पथि सद्धर्मं प्रतिष्ठापुरमीयतुः ।
क्रीडन्त्यः कन्यका दृष्टास्तत्र देशे मनोरमे ॥ ४९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तासां समाजे गौराङ्गी सुशीला नाम कन्यका ।
तया सह सखी काचिच्चकार कलहं भृशम् ॥ ५० ॥
गालनं च ददौ तस्यै रण्डेऽभाग्ये मुहुर्मुहुः ।

सुशीलोवाच

सखि त्वया गालनं मे व्यर्थं दत्तं शुभानने ॥ ५१ ॥
जनन्या मे मानवत्याश्चास्ति गौरीव्रतं शुभम् ।
तस्य प्रसादात् सकलाः सम्बन्धिन्यः प्रियाः स्त्रियः ॥ ५२ ॥
आजन्माविधवा जाताः किं पुनः कन्यका ध्रुवम् ।
वक्ष्ये तस्य प्रभावं किं व्रतराजस्य भामिनि ॥ ५३ ॥
पूजने धूपगन्धोऽयं यत्र तत्र सुखं भवेत् ।
इति श्रुत्वा ततो वाक्यं विस्मयोत्फुल्ललोचनः ॥ ५४ ॥
मातुलश्चिन्तयामास बालकस्य प्रियं ततः ।
शतजीवी भवेदेष एतद्धस्ताक्षता यदि ॥ ५५ ॥
पतन्त्यमुष्य शिरसि विभाव्येति पुनः पुनः ।
सुशीलामेव पश्यन् स विस्मयोत्फुल्ललोचनः ॥ ५६ ॥
सुशीला प्रस्थिता गेहे तदनुप्रस्थितावुभौ ।
स्वगृहं प्राप गौराङ्गी निकटे तद्गृहस्य तौ ॥ ५७ ॥
सत्तडागे रम्यदेशे वासं चक्रतुरादरात् ।
विवाहकाले सम्प्राप्ते सुशीलाजनको हरिः ॥ ५८ ॥
विवाहोद्योगवान् जातो निश्चिकाय हरं वरम् ।
असमर्थं हरं दृष्ट्वा तन्मातापितरावुभौ ॥ ५९ ॥
ययाचतुः शिवं बद्ध्वाञ्जली विनययुक्तकौ ।

वरपितरावूचतुः

उपस्थितो विवाहो नौ पुत्रस्य शुभया हरेः ॥ ६० ॥
सुशीलया कन्ययायमसमर्थश्च दृश्यते ।
अतो देयः शिवः श्रीमाँल्लग्नकाले त्वया विभो ॥ ६१ ॥
लग्नं भविष्यति ततो देयोऽस्माभिः शिवस्तव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मातुल उवाच

अवश्यं लग्नकालेऽसौ शिवो ग्राह्यः प्रियंवदः ॥ ६२ ॥
ततो मुहूर्ते सम्प्राप्ते विवाहमकरोच्छिवः ।
तत्रैव शयनं चक्रे ससुशीलः प्रियंवदः ॥ ६३ ॥
स्वप्ने सा मङ्गलागौरी मातृरूपेण भास्वता ।
सुशीलामवदत् साध्वी हितं वचनमेव च ॥ ६४ ॥

गौर्युवाच

सुशीले तव गौराङ्गि भर्तुर्दंशार्थमागतः ॥ ६५ ॥
महान् भुजंग उत्तिष्ठ दुग्धं स्थापय तत्पुरः ।
घटं च स्थापयाशु त्वं तन्मध्ये स गमिष्यति ॥ ६६ ॥
कूर्पासमङ्गान्निष्कास्य बन्धनीयस्त्वया घटः ।
प्रातरुत्थाय देहि त्वं मात्रे वायनकं शुभम् ॥ ६७ ॥
इति गौरीवचः श्रुत्वा सुशीला क्षणमुत्थिता ।
ददर्शाग्रे निःश्वसन्तं कृष्णसर्पं महाभयम् ॥ ६८ ॥
ततश्चकार गौर्युक्तं प्रवृत्ता निद्रितुं ततः ।
उवाच वर आसन्नः क्षुल्लग्ना महती मम ॥ ६९ ॥
भक्षणायाशु देहि त्वं लड्डुकादिकमुत्तमम् ।
श्रुत्वेति वाक्यं पात्रे सा ददौ लड्डुकमुत्तमम् ॥ ७० ॥
भक्षयित्वा शिवो हैमे तस्मिन् पात्रेऽङ्गुलीयकम् ।
दत्त्वा तत् स्थापयामास स्थले गुप्ते शुभाननः ॥ ७१ ॥
सुखेन शयनं चक्रे पृथिव्यां सर्वकोविदः ।
ततः प्रभातसमये शिव आगाद् गृहं स्वकम् ॥ ७२ ॥
स्नानशुद्धा सुशीला सा मात्रे वायनकं ददौ ।
माता ददर्श तन्मध्ये मुक्ताहारमनुत्तमम् ॥ ७३ ॥
ददौ प्रियायै कन्यायै सहसा तुष्टमानसा ।
क्रीडाकाले तु सम्प्राप्ते हर आगात् तु मण्डपे ॥ ७४ ॥
आदेशयत् सुशीलां तां क्रीडार्थं जननी ततः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुशीलेवाच

नायं वरो मे जननि येन पाणिग्रहः कृतः ।
अनेन सह नास्तीह क्रीडनेच्छा तथा न मे ॥ ७५ ॥
इति श्रुत्वा समाक्रान्तौ चिन्तया पितरौ ततः ।
अन्नदानमुपायं च कन्यापतिविशोधने ॥ ७६ ॥
तदारभ्य चक्रतुस्तौ पुराणोक्तविधानतः ।
सुशीला पादयोश्चक्रे क्षालनं मुद्रिकान्विता ॥ ७७ ॥
जलधारां ददौ माता चन्दनं पुत्रको हरेः ।
हरिर्ददौ च ताम्बूलं बुभुजुस्तत्र मानवाः ॥ ७८ ॥
इति रीत्यान्नदानं तत् प्रवृत्तं भिक्षुसौख्यदम् ।
तावुभौ प्रस्थितौ काश्यां प्राप्तौ काशीं सुखप्रदाम् ॥ ७९ ॥
निर्मलाम्भसि गङ्गायाः स्नानं चक्रतुरादरात् ।
स्वर्गद्वारं प्रस्थितौ तौ कुर्वन्तौ धर्ममुत्तमम् ॥ ८० ॥
पीताम्बराणि ददतुर्भिक्षुकाणां गृहे गृहे ।
आशिषश्च ददुस्तस्मै चिरञ्जीवी भवेति ते ॥ ८१ ॥
विश्वेश्वरं समायातौ नत्वा स्तुत्वा पुनः पुनः ।
स्वयं गृहं प्रस्थितौ तौ शिवो मार्गे ततोऽवदत् ॥ ८२ ॥

शिव उवाच

काये मे किञ्चिदस्वास्थ्यं मातुल प्रतिभाति हि ।
ततः प्राणोत्क्रमे तस्य यमदूता उपस्थिताः ॥ ८३ ॥
मङ्गलागौरिका चापि तेषां युद्धमभून्महत् ।
जित्वा तान् मङ्गलान् प्राणान् ददौ तस्मै शिवाय च ॥ ८४ ॥
शिवोऽकस्मादुत्थितोऽसौ मातुलं प्रत्युवाच ह ।
स्वप्ने युद्धं मया दृष्टं मङ्गलायमभृत्ययोः ॥ ८५ ॥
जितास्ते मङ्गलागौर्या ततोऽहं शयनच्युतः ।

मातुल उवाच

यज्जातं शिव तज्जातं न स्मर्तव्यं त्वया पुनः ॥ ८६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गच्छाव आवां नगरे पितरौ द्रष्टुमुत्सुकौ ।
प्रस्थितौ तौ ततस्तस्मात् प्रतिष्ठापुरमापतुः ॥ ८७ ॥
रम्ये तडागे तत्रैतौ पाकारम्भं विचक्रतुः ।
दृष्टौ तौ हरिदासीभिर्धैर्योदारधरौ शुभौ ॥ ८८ ॥

दास्य ऊचुः

अन्नदानं हरेर्गेहे प्रवृत्तं तत्र गम्यताम् ।
भो दास्यो यात्रिकावावां गच्छावो न क्वचिद् गृहे ॥ ८९ ॥

उभाऊचतुः

इति श्रुत्वा तयोर्वाक्यं दास्यो जग्मुः स्वकं गृहम् ।
स्वस्वामिनिकटे वाक्यमवदन् सादरं तदा ॥ ९० ॥
सर्वं दासीवचः श्रुत्वा तदर्थं प्रभुरादरात् ।
प्रेषयामास हस्त्यादिरत्नवस्त्राणि भूरिशः ॥ ९१ ॥
तद् दृष्ट्वा विस्मितौ तौ च जग्मतुश्च हरेर्गृहम् ।
हरिर्मातुलमभ्यर्च्य शिवं पूजितुमागतः ॥ ९२ ॥
क्षालयन्ती च सा कन्या चरणौ तस्य सत्रपा ।
अभूद् वरो मेऽयमिति जननीं प्रत्युवाच ह ॥ ९३ ॥
हरिः पप्रच्छ साश्चर्यं शिवं मङ्गलदर्शनम् ।

हरिरुवाच

किञ्चिच्चिह्नं तवास्त्यत्र ब्रूहि मे शिव दर्शय ॥ ९४ ॥
हरेस्तु तद् वचः श्रुत्वा शिवः संतुष्टमानसः ।
ममेदं चिह्नमस्तीहेत्युक्त्वा तद्गृहमागतः ॥ ९५ ॥
तत आनीय तत् पात्रं दर्शयामास सादरम् ।
तत् पात्रं च हरिर्दृष्ट्वा कन्यादानं चकार सः ॥ ९६ ॥
ददौ रत्नानि वस्त्राणि सुवर्णानि बहून्यपि ।
तामादाय प्रस्थितौ तौ ददतो बहुलं धनम् ॥ ९७ ॥
श्रावणे मासि सम्प्राप्ते व्रतं भौमे चकार सा ।
भुक्त्वा सर्वे प्रस्थितास्ते योजनं जग्मुरुत्तमाः ॥ ९८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुशीलोवाच

गौरीविसर्जनं चापि दीपमानं तथैव च।
कृत्वा गन्तव्यमस्माभिः पितरौ द्रष्टुमादरात् ॥ ९९ ॥
इत्युक्त्वा आगता यत्र गौर्या आवाहनं कृतम्।
ददृशुस्तत्र सौवर्णं देवालयमनुत्तमम् ॥ १०० ॥
गौरीविसर्जनं दीपमानं सा च व्यचीकरत्।
ततः सर्वे प्रस्थितास्ते पितरौ द्रष्टुमुत्सुकाः ॥ १०१ ॥
कुण्डिनासन्नदेशे तान् दृष्ट्वा विस्मयिनो जनाः।
अब्रुवंस्ते धर्मपालं सोत्कण्ठं प्रियदर्शनाः ॥ १०२ ॥

जना ऊचुः

धर्मपालाद्य ते पुत्रः सभार्यः श्यालकस्तथा।
समायातो वयं दृष्ट्वा अधुनैव समागताः ॥ १०३ ॥
यावज्जना वदन्त्येवं तावत् सोऽपि समागतः।
नमस्कारांश्चकारासौ पितृभ्यां पितृवल्लभः ॥ १०४ ॥
मातुलोऽपि नतिं चक्रे भगिनीधर्मपालयोः।
सुशीला श्वशुरं चापि श्वश्रूं नत्वा स्थिता तदा ॥ १०५ ॥

श्वश्रूरुवाच

सुशीले तद् व्रतं ब्रूहि यद्व्रतस्य प्रभावतः।
आयुर्वृद्धिः शिशोर्मेऽपि जाता कमललोचने ॥ १०६ ॥

सुशीलोवाच

न जानेऽहं व्रतं श्वश्रूर्जाने मानवतीहरौ।
श्वशुरं धर्मपालं च श्वश्रूं च भवतीं तथा ॥ १०७ ॥
मङ्गलं देवतां चैव वरं तु युवयोः सुतम्।
इत्युक्त्वा च सुशीला सा बुभुजे स्वान्तहर्षिता ॥ १०८ ॥

श्रीकृष्ण उवाच

तस्माद् व्रतमिदं धर्मं स्त्रीभिः कार्यं सदैव तु।

युधिष्ठिर उवाच

फलमस्य श्रुतं कृष्ण विधानं ब्रूहि केशव ॥ १०९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीकृष्ण उवाच

विवाहात् प्रथमं वर्षमारभ्य पञ्चवत्सरम्।
श्रावणे मासि भौमेषु चतुर्षु व्रतमाचरेत्॥ ११० ॥
प्रथमे वत्सरे मातुर्गेहे कर्तव्यमेव च।
ततो भर्तृगृहे कार्यमवश्यं स्त्रीभिरादरात्॥ १११ ॥
तत्र तु प्रथमे वर्षे संकल्प्य व्रतमुत्तमम्।
रम्ये पीठे च संस्थाप्य मङ्गलां च तदग्रतः॥ ११२ ॥
गोधूमपिष्टरचितमुपलं दृषदं तथा।
महान्तमेकं दीपं च घृतेन परिपूरितम्॥ ११३ ॥
वर्त्या षोडशभिः सूत्रैः कृतया सहितं न्यसेत्।
उपचारैः षोडशभिर्गन्धपुष्पादिभिस्तथा॥ ११४ ॥
पत्रैः पुष्पैः षोडशभिर्नानाधान्यैश्च जीरकैः।
धान्याकैस्तण्डुलैश्चैव स्वच्छैः षोडशसंख्यकैः॥ ११५ ॥
अपामार्गस्य पत्रैश्च दूर्वाधत्तूरपत्रकैः।
सर्वैः षोडशसंख्याकैर्बिल्वपत्रैश्च पञ्चभिः॥ ११६ ॥
पूजयेन्मङ्गलां गौरीमङ्गपूजां ततश्चरेत्।
धूपादिकं निवेद्याथ वायनं तु समर्पयेत्॥ ११७ ॥
ब्राह्मणाय तथा मात्रेऽन्याभ्यश्चैव यत्नतः।
लड्डुकंचुकिसंयुक्तं सवस्त्रफलदक्षिणम्॥ ११८ ॥
नीराजनं ततः कुर्याद् दीपैः षोडशसंख्यकैः।
भोक्तव्या दीपकाश्चैव[1] अन्नं लवणवर्जितम्॥ ११९ ॥
रात्रौ जागरणं कृत्वा प्रातः स्नात्वा समाहिता।
विसर्जनं मङ्गलाया दीपमानं क्रमाच्चरेत्॥ १२० ॥
पञ्चसंवत्सरेष्वेवं कर्तव्यं पतिमिच्छुभिः।

इति श्रीभविष्यपुराणे मङ्गलागौरीव्रतं विधिसहितं सम्पूर्णम्।

---

१. जठराग्निको बढ़ानेवाले भोज्यपदार्थ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हरितालिकाव्रत-कथा

मन्दारमालाकुलितालकायै कपालमालाकृतशेखराय।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय॥ १॥
कैलासशिखरे रम्ये गौरी पृच्छति शंकरम्।
गुह्याद् गुह्यतरं गुह्यं कथयस्व महेश्वर॥ २॥
सर्वेषां धर्मसर्वस्वमल्पायासं महत् फलम्।
प्रसन्नोऽसि यदा नाथ तथ्यं ब्रूहि ममाग्रतः॥ ३॥
केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना।
अनादिमध्यनिधनो भर्ता चैव जगत्प्रभुः॥ ४॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि तवाग्रे व्रतमुत्तमम्।
यद् गोप्यं मम सर्वस्वं कथयामि तव प्रिये॥ ५॥
यथा चोडुगणे चन्द्रो ग्रहाणां भानुरेव च।
वर्णानां च यथा विप्रो देवानां विष्णुरुत्तमः॥ ६॥
नदीषु च यथा गङ्गा पुराणानां तु भारतम्।
वेदानां च यथा साम इन्द्रियाणां मनो यथा॥ ७॥
पुराणवेदसर्वस्वमागमेन यथोदितम्।
एकाग्रेण शृणुष्वैतद् यथादृष्टं पुरातनम्॥ ८॥
येन पुण्यप्रभावेण प्राप्तमर्द्धासनं मम।
सर्वं तत् कथयिष्येऽहं त्वं मम प्रेयसी यतः॥ ९॥
भाद्रे मासि सिते पक्षे तृतीया हस्तसंयुता।
तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते॥ १०॥
शृणु देवि त्वया पूर्वं यद् व्रतं चरितं महत्।
तत् सर्वं कथयिष्यामि यथावृत्तं हिमाचले॥ ११॥

पार्वत्युवाच

कथं कृतं मया नाथ व्रतानामुत्तमं व्रतम्।
तत् सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर॥ १२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ईश्वर उवाच

अस्ति तत्र महानेको हिमवान् नग उत्तमः ।
नानाभूतिसमाकीर्णो नानाद्रुमसमाकुलः ॥ १३ ॥
नानापक्षिसमायुक्तो नानामृगविचित्रितः ।
तत्र देवाः सगन्धर्वाः सिद्धचारणगुह्यकाः ॥ १४ ॥
विचरन्ति सदा हृष्टा गन्धर्वा गीततत्पराः ।
स्फाटिकैः काञ्चनैः शृङ्गैर्मणिवैदूर्यभूषितैः ॥ १५ ॥
भुजैर्लिखन्निवाकाशं सुहृदो मन्दिरं यथा ।
हिमेन पूरितो नित्यं गङ्गाध्वनिनिनादितः ॥ १६ ॥
पार्वति त्वं यथा बाल्ये परमाचरती तपः ।
अब्दद्वादशकं देवि धूम्रपानमधोमुखी ॥ १७ ॥
संवत्सरचतुःषष्टिं पक्वपर्णाशनं कृतम् ।
माघमासे जले मग्ना वैशाखे चाग्निसेविनी ॥ १८ ॥
श्रावणे च बहिर्वासा अन्नपानविवर्जिता ।
दृष्ट्वा तातेन तत् कष्टं चिन्तया दुःखितोऽभवत् ॥ १९ ॥
कस्मै देया मया कन्या एवं चिन्तातुरोऽभवत् ।
तदैवाम्बरतः प्राप्तो ब्रह्मपुत्रस्तु धर्मवित् ॥ २० ॥
नारदो मुनिशार्दूलः शैलपुत्रीदिदृक्षया ।
दत्त्वाऽर्घ्यं विष्टरं पाद्यं नारदं प्रोक्तवान् गिरिः ॥ २१ ॥

हिमवानुवाच

किमर्थमागतः स्वामिन् वदस्व मुनिसत्तम ।
महाभाग्येन सम्प्राप्तं त्वदागमनमुत्तमम् ॥ २२ ॥

नारद उवाच

शृणु शैलेन्द्र मद्वाक्यं विष्णुना प्रेषितोऽस्म्यहम् ।
योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया ॥ २३ ॥
वासुदेवसमो नास्ति ब्रह्मविष्णुशिवादिषु ।
तस्मै देया त्वया कन्या अत्रार्थे सम्मतं मम ॥ २४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

****

हिमवानुवाच

वासुदेवः स्वयं देवः कन्यां प्रार्थयते यदि ।
तदा मया प्रदातव्या त्वदागमनगौरवात् ॥ २५ ॥
इत्येवं गदितं श्रुत्वा नभस्यन्तर्दधे मुनिः ।
ययौ पीताम्बरधरं शङ्खचक्रगदाधरम् ॥ २६ ॥
कृताञ्जलिपुटो भूत्वा मुनीन्द्रस्तमभाषत ।
शृणु देव भवत्कार्यं विवाहो निश्चितस्तव ॥ २७ ॥
हिमवांस्तु तदा गौरीमुवाच वचनं मुदा ।
दत्तासि त्वं मया पुत्रि देवाय गरूडध्वजे[1] ॥ २८ ॥
श्रुत्वा वाक्यं पितुर्देवी गता सा सखिमन्दिरम् ।
भूमौ पतित्वा सा तत्र विललापातिदुःखिता ॥ २९ ॥
विलंपन्तीं तदा दृष्ट्वा सखी वचनमब्रवीत् ।
किमर्थं दुःखिता देवि कथयस्व ममाग्रतः ॥ ३० ॥
यद् भवत्याभिलषितं करिष्येऽहं न संशयः ।

पार्वत्युवाच

सखि शृणु मम प्रीत्या मनोऽभिलषितं मम ।
महादेवं च भर्तारं करिष्येऽहं न संशयः ॥ ३१ ॥
एतन्मे चिन्तितं कार्यं तातेन कृतमन्यथा ॥ ३२ ॥
तस्माद् देहपरित्यागं करिष्येऽहं न संशयः ।
पार्वत्या वचनं श्रुत्वा सखी वचनमब्रवीत् ॥ ३३ ॥

सख्युवाच

पिता यत्र न जानाति गमिष्यावो हि तद् वनम् ।
इत्येवं सम्मतं कृत्वा नीतासि त्वं महद् वनम् ॥ ३४ ॥
पिता निरीक्षयामास हिमवांस्तु गृहे गृहे ।
केन नीतासि मे पुत्री देवदानवकिन्नरैः ॥ ३५ ॥

---

१. छान्दस प्रयोग ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नारदाग्रे कृतं सत्यं किं दास्ये गरुडध्वजे।
इत्येवं चिन्तयाऽऽविष्टो मूर्च्छितो निपपात ह ॥ ३६ ॥
हा हा कृत्वा प्रधावन्ति लोकास्ते गिरिपुङ्गवम्।
ऊचुर्गिरिवरं सर्वे मूर्च्छाहेतुं गिरे वद ॥ ३७ ॥

गिरिरुवाच

दुःखस्य हेतुं शृणुत कन्यारत्नं हृतं मम।
दष्टा वा कालसर्पेण सिंहव्याघ्रेण वा हता ॥ ३८ ॥
न जाने क्व गता पुत्री केन दुष्टेन वा हृता।
चकम्पे शोकसंतप्तो वातेनेव महातरुः ॥ ३९ ॥
गिरिर्वनाद् वनं यातस्त्वदालोकनकारणात्।
सिंहव्याघ्रैश्च भल्लैश्च रोहिभिश्च महाघनम् ॥ ४० ॥
त्वं चापि विपिने घोरे व्रजन्ती सखिभिः सह।
तत्र दृष्ट्वा नदीं रम्यां तत्तीरे च महागुहाम् ॥ ४१ ॥
तां प्रविश्य सखीसार्द्धमन्नभोगविवर्जिता।
संस्थाप्य बालुकालिङ्गं पार्वत्या सहितं मम ॥ ४२ ॥
भाद्रशुक्लतृतीयायामर्चयन्ती तु हस्तभे।
तत्र वाद्येन गीतेन रात्रौ जागरणं कृतम् ॥ ४३ ॥
व्रतराजप्रभावेण आसनं चलितं मम।
सम्प्राप्तोऽहं तदा तत्र यत्र त्वं सखिभिः सह ॥ ४४ ॥
प्रसन्नोऽस्मि मया प्रोक्तं वरं ब्रूहि वरानने।

पार्वत्युवाच

यदि देव प्रसन्नोऽसि भर्ता भव महेश्वर ॥ ४५ ॥
तथेत्युक्त्वा तु सम्प्राप्तः कैलासं पुनरेव च।
ततः प्रभाते सम्प्राप्ते नद्यां कृत्वा विसर्जनम् ॥ ४६ ॥
पारणं तु कृतं तत्र सख्या सार्द्धं त्वया शुभे।
हिमवानपि तं देशमाजगाम घनं वनम् ॥ ४७ ॥
चतुराशा निरीक्षंस्तु विह्वलः पतितो भुवि।
दृष्ट्वा तत्र नदीतीरे प्रसुप्तं कन्यकाद्वयम् ॥ ४८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्थाप्योत्सङ्गमारोप्य रोदनं कृतवान् गिरिः ।
सिंहव्याघ्राहिभल्लूकैर्वने दुष्टे कुतः स्थिता ॥ ४९ ॥

पार्वत्युवाच

शृणु तात मया ज्ञातं त्वं दास्यसीश्वराय माम् ।
तदन्यथाकृतं तात तेनाहं वनमागता ॥ ५० ॥
ददासि तात यदि मामीश्वराय तदा गृहम् ।
आगमिष्यामि नैवं चेदिह स्थास्यामि निश्चितम् ॥ ५१ ॥
तथेत्युक्त्वा हिमवता नीतासि त्वं गृहं प्रति ।
पश्चाद् दत्ता त्वमस्माकं कृत्वा वैवाहिकीं क्रियाम् ॥ ५२ ॥
तेन व्रतप्रभावेण सौभाग्यं साधितं त्वया ।
अद्यापि व्रतराजस्तु न कस्यापि निवेदितः ॥ ५३ ॥
नामास्य व्रतराजस्य शृणु देवि यथाभवत् ।
आलिभिर्हरिता यस्मात् तस्मात् सा हरितालिका ॥ ५४ ॥

देव्युवाच

नामेदं कथितं देव विधिं वद मम प्रभो ।
किं पुण्यं किं फलं चास्य केन च क्रियते व्रतम् ॥ ५५ ॥

ईश्वर उवाच

शृणु देवि विधिं वक्ष्ये नारीसौभाग्यहेतुकम् ।
करिष्यति प्रयत्नेन यदि सौभाग्यमिच्छति ॥ ५६ ॥
तोरणादि प्रकर्तव्यं कदलीस्तम्भमण्डितम् ।
आच्छाद्य पट्टवस्त्रैस्तु नानावर्णविचित्रितैः ॥ ५७ ॥
चन्दनेन सुगन्धेन लेपयेद् गृहमण्डितम् ।
शङ्खभेरीमृदङ्गैस्तु कारयेद् बहुनिःस्वनान् ॥ ५८ ॥
नाना मङ्गलगीतं च कर्त्तव्यं मम सद्मनि ।
स्थापयेद् बालुकालिङ्गं पार्वत्या सहितं मम ॥ ५९ ॥
पूजयेद् बहुपुष्पैश्च गन्धधूपादिभिर्नवैः ।
नानाप्रकारैर्नैवेद्यैः पूजयेज्जागरं चरेत् ॥ ६० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नालिकेरैः पूगफलैर्जम्बीरैर्बकुलैस्तथा ।
बीजपूरैः सनारङ्गैः फलैश्चान्यैश्च भूरिशः ॥ ६१ ॥
ऋतुकालोद्भवैर्भूरिप्रकारैः कन्दमूलकैः ।
'ॐ नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने ॥ ६२ ॥
नन्दिभृङ्गिमहाकालगणयुक्ताय शम्भवे ।
शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे ॥ ६३ ॥
शिवायै सर्वमाङ्गल्यै शिवरूपे जगन्मये ।
शिवे कल्याणदे नित्यं शिवरूपे नमोऽस्तु ते ॥ ६४ ॥
शिवरूपे नमस्तुभ्यं शिवायै सततं नमः ।
नमस्ते ब्रह्मचारिण्यै जगद्धात्र्यै नमो नमः' ॥ ६५ ॥
संसारभयसंतापात् त्राहि मां सिंहवाहिनि ।
येन कामेन देवि त्वं पूजितासि महेश्वरि ॥ ६६ ॥
राज्यं सौभाग्यसम्पत्तिं देहि मामम्ब पार्वति ।
मन्त्रेणानेन देवि त्वां पूजयित्वा मया सह ॥ ६७ ॥
कथां श्रुत्वा विधानेन दद्यादन्नं च भूरिशः ।
ब्राह्मणेभ्यो यथाशक्ति देया वस्त्रहिरण्यगाः ॥ ६८ ॥
अन्येषां भूयसी देया स्त्रीणां वै भूषणादिकम् ।
भर्त्रा सह कथां श्रुत्वा भक्तियुक्तेन चेतसा ॥ ६९ ॥
कृत्वा व्रतेश्वरं देवि सर्वपापैः प्रमुच्यते ।
सप्तजन्म भवेद् राज्यं सौभाग्यं चापि वर्द्धते ॥ ७० ॥
तृतीयायां तु या नारी आहारं कुरुते यदि ।
सप्तजन्म भवेद् बन्ध्या वैधव्यं जन्मजन्मनि ॥ ७१ ॥
दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी ।
पच्यते नरके घोरे नोपवासं करोति या ॥ ७२ ॥
राजते काञ्चने ताम्रे वैणवे वाथ मृण्मये ।
भाजने विन्यसेदन्नं सवस्त्रफलदक्षिणम् ।
दानं च द्विजवर्याय दद्यादन्ते च पारणा ॥ ७३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवंविधा या कुरुते च नारी
त्वया समाना रमते च भर्त्रा।
भोगाननेकान् भुवि भुज्यमाना
सायुज्यमन्ते लभते हरेण ॥ ७४ ॥
अश्वमेधसहस्राणि वाजपेयशतानि च।
कथाश्रवणमात्रेण तत् फलं प्राप्यते नरैः ॥ ७५ ॥
एतत् ते कथितं देवि तवाग्रे व्रतमुत्तमम्।
कोटियज्ञकृतं पुण्यमस्यानुष्ठानमात्रतः ॥ ७६ ॥

इति श्रीभविष्योत्तरपुराणे हरगौरीसंवादे हरितालिकाव्रतकथा सम्पूर्णा।

(भाद्रपद-कृष्ण) संकष्टचतुर्थीव्रत-कथा

ऋषय ऊचुः

दारिद्र्यशोककष्टाद्यैः पीडितानां च वैरिभिः।
राज्यभ्रष्टैर्नृपैः सर्वैः क्रियते किं शुभार्थिभिः ॥ १ ॥
धनहीनैर्नरैः स्कन्द सर्वोपद्रवपीडितैः।
विद्यापुत्रगृहभ्रष्टै रोगयुक्तैः शुभार्थिभिः ॥ २ ॥
कर्त्तव्यं किं वदोपायं पुनः क्षेमार्थसिद्धये।

स्कन्द उवाच

शृणुध्वं मुनयः सर्वे व्रतानामुत्तमं व्रतम् ॥ ३ ॥
संकष्टतरणं नामामुत्रेह सुखदायकम्।
येनोपायेन संकष्टं तरन्ति भुवि देहिनः ॥ ४ ॥
यद् व्रतं देवकीपुत्रः कृष्णो धर्माय दत्तवान्।
अरण्ये क्लिश्यमानाय पुनः क्षेमार्थसिद्धये ॥ ५ ॥
यथा कथितवान् पूर्वं गणेशो मातरं प्रति।
तथा कथितवाञ्छ्रीशो द्वापरे पाण्डवान् प्रति ॥ ६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषय ऊचुः

कथं कथितवानम्बां पार्वतीं श्रीगणेश्वरः ।
तथा पृच्छन्ति मुनयो लोकानुग्रहकाङ्क्षिणः ॥ ७ ॥

स्कन्द उवाच

पुरा कृतयुगे पुण्ये हिमाचलसुता सती ।
तपस्तप्तवती भूरि तेनालब्धः शिवः पतिः ॥ ८ ॥
तदास्मरत् सा हेरम्बं गणेशं पूर्वजं सुतम् ।
तत्क्षणादागतं दृष्ट्वा गणेशं परिपृच्छति ॥ ९ ॥

पार्वत्युवाच

तपस्तप्तं मया घोरं दुश्चरं लोमहर्षणम् ।
न प्राप्तः स मया कान्तो गिरीशो मम वल्लभः ॥ १० ॥
संकष्टतरणं दिव्यं व्रतं नारद उक्तवान् ।
त्वदीयं यद् व्रतं तावत् कथयस्व पुरातनम् ॥ ११ ॥
तच्छ्रुत्वा पार्वतीवाक्यं संकष्टतरणं व्रतम् ।
प्रीत्या कथितवान् देवो गणेशो ज्ञानसिद्धिदः ॥ १२ ॥

गणेश उवाच

श्रावणे बहुले पक्षे चतुर्थ्यां तु विधूदये ।
गणेशं पूजयित्वा तु चन्द्रायार्घ्यं प्रदापयेत् ॥ १३ ॥

पार्वत्युवाच

क्रियते केन विधिना किं कार्यं किं च पूजनम् ।
उद्यापनं कदा कार्यं मन्त्राः के स्युस्तु पूजने ॥ १४ ॥
किं ध्यानं श्रीगणेशस्य गणेश वद विस्तरात् ।

गणेश उवाच

चतुर्थ्यां प्रातरुत्थाय दन्तधावनपूर्वकम् ॥ १५ ॥
ग्राह्यं व्रतमिदं पुण्यं संकष्टतरणं शुभम् ।
कर्त्तव्यमिति संकल्प्य व्रतेऽस्मिन् गणपं स्मरेत् ॥ १६ ॥
(स्वीकारमन्त्रः) निराहारोऽस्मि देवेश यावच्चन्द्रोदयो भवेत् ।
भोक्ष्यामि पूजयित्वाहं संकष्टात् तारयस्व माम् ॥ १७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवं संकल्प्य राजेन्द्र स्नात्वा कृष्णतिलैः शुभे।
आह्निकं तु विधायैवं पश्चात् पूज्यो गणाधिपः ॥ १८ ॥
त्रिभिर्माषैस्तदर्धेन तृतीयांशेन वा पुनः।
यथाशक्त्या तु वा हैमी प्रतिमा क्रियते शुभा ॥ १९ ॥
हेमाभावे तु रौप्यस्य ताम्रस्यापि यथासुखम्।
सर्वथैव दरिद्रेण क्रियते मृण्मयी शुभा ॥ २० ॥
वित्तशाठ्यं न कुर्वीत कृते कार्यं विनश्यति।
जलपूर्णं वस्त्रयुतं कुम्भं तदुपरि विन्यसेत् ॥ २१ ॥
पूर्णपात्रं तत्र पद्मं लिखेदष्टदलं शुभम्।
देवतां तत्र संस्थाप्य गन्धपुष्पैः प्रपूजयेत् ॥ २२ ॥
एवं व्रतं प्रकर्तव्यं प्रतिमासं त्वयाद्रिजे।
यावज्जीवं तु वा वर्षाण्येकविंशतिमेव वा ॥ २३ ॥
अशक्तोऽप्येकवर्षं वा प्रतिवर्षमथापि वा।
उद्यापनं तु कर्तव्यं चतुर्थ्यां श्रावणेऽसिते ॥ २४ ॥
स्वीकारश्च तथा कार्यः संकष्टहरणे तिथौ।
गाणपत्यं तथाऽऽचार्यं सर्वशास्त्रविशारदम् ॥ २५ ॥
श्रद्धया प्रार्थयेदादौ तेनोक्तं विधिमाचरेत्।
एकविंशतिविप्रांश्च वस्त्रालंकारभूषणैः ॥ २६ ॥
पूजयेद् गोहिरण्याद्यैर्हुत्वाग्नौ विधिपूर्वकम्।
होमद्रव्यं मोदकाश्च तिलयुक्ता घृतप्लुताः ॥ २७ ॥
अष्टोत्तरसहस्रं वा नो चेदष्टोत्तरं शतम्।
अष्टाविंशतिसंख्याकान् मोदकान् वा सशर्करान् ॥ २८ ॥
अशक्तोऽष्टौ शुभान् स्थूलाञ्जुहुयाज्जातवेदसि।
वैदिकेन च मन्त्रेण आगमोक्तेन वा तथा ॥ २९ ॥
अथवा नाममन्त्रेण होमं कुर्याद् यथाविधि।
पुष्पमण्डपिका कार्या गणेशाह्लादकारिणी ॥ ३० ॥
पूजयेत् तत्र गणपं भक्तसंकष्टनाशनम्।
गीतवादित्रनिनदैर्भक्तिभावपुरस्कृतैः ॥ ३१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुराणवेदनिर्घोषैस्तोषयेच्च गणेश्वरम् ।
एवं जागरणं कार्यं शक्त्या दानादिकं तथा ॥ ३२ ॥
सपत्नीकमथाचार्यं तोषयेद् वस्त्रभूषणैः ।
उपानच्छत्रगोदानकमण्डलुफलादिभिः ॥ ३३ ॥
शय्यावाहनभूदानधनधान्यगृहादिभिः ।
यथाशक्त्या प्रकर्तव्यं दारिद्र्याभावमिच्छता ॥ ३४ ॥
एकविंशतिविप्रांश्च भोजयेन्नामभिर्मम ।
गजास्यो विघ्नराजश्च लम्बोदरशिवात्मजौ ॥ ३५ ॥
वक्रतुण्डः शूर्पकर्णः कुब्जश्चैव विनायकः ।
विघ्ननाशो हि विकटो वामनः सर्वदैवतः ॥ ३६ ॥
सर्वार्तिनाशी भगवान् विघ्नहर्ता च धूमकः ।
सर्वदेवाधिदेवश्च सर्वे षोडश वै स्मृताः ॥ ३७ ॥
एकदन्तः कृष्णपिङ्गो भालचन्द्रो गणेश्वरः ।
गणपश्चैकविंशश्च सर्व एते गणेश्वराः ॥ ३८ ॥
दुर्गोपेन्द्रश्च रुद्रश्च कुलदेव्याधिकं भवेत् ।
विशेषेणाष्टसंख्याकैर्मोदकैर्हवनं स्मृतम् ॥ ३९ ॥

श्रीकृष्ण उवाच

एवं तु कथितं सर्वं गणेशेन स्वयं नृप ।
पार्वत्या तत् कृतं राजन् व्रतं संकष्टनाशनम् ॥ ४० ॥
व्रतेनानेन सा प्राप महादेवं पतिं स्वकम् ।
तत् कुरुष्व महाराज व्रतं संकष्टनाशनम् ॥ ४१ ॥
चतुर्थी संकटा नाम स्कन्देन कथिता ऋषीन् ।
ऋषिभिर्लोककामैस्तैर्लोके ततमिदं व्रतम् ॥ ४२ ॥

सूत उवाच

कृतं युधिष्ठिरेणैतद् राज्यकामेन वै द्विज ।
तेन शत्रून् निहत्याजौ स्वराज्यं प्राप्तवान् स्वयम् ॥ ४३ ॥
तस्मात् सर्वप्रयत्नेन व्रतं कार्यं विचक्षणैः ।
येन धर्मार्थकामाश्च मोक्षश्चापि भवेत् किल ॥ ४४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

य: करोति व्रतं विप्राः सर्वकामार्थसिद्धिदम् ।
स वाञ्छितफलं प्राप्य पश्चाद् गणपतां व्रजेत् ॥ ४५ ॥
यदा यदा परं विप्रा नरः प्राप्नोति संकटम् ।
तदा तदा प्रकर्त्तव्यं व्रतं संकष्टनाशनम् ॥ ४६ ॥
त्रिपुरं हन्तुकामेन कृतं देवेन शूलिना ।
त्रैलोक्यभूतिकामेन महेन्द्रेण तथा कृतम् ॥ ४७ ॥
रावणेन कृतं पूर्वं वालिबन्धनसंकटे ।
स्वकीयं प्राप्तवान् राज्यं गणेशस्य प्रसादतः ॥ ४८ ॥
सीतान्वेषणकामेन कृतं वायुसुतेन च ।
संकल्प्य दृष्टवान् सोऽयं सीतां रामप्रियां पुरा ॥ ४९ ॥
दमयन्त्या कृतं पूर्वं नलान्वेषणकारणात् ।
सा पतिं नैषधं लेभे पुण्यश्लोकं द्विजोत्तमाः ॥ ५० ॥
अहल्यापि पतिं लेभे गौतमं प्राणवल्लभम् ।
विद्यार्थी लभते विद्यां धनार्थी धनमाप्नुयात् ॥ ५१ ॥
पुत्रार्थी पुत्रमाप्नोति रोगी रोगात् प्रमुच्यते ॥ ५२ ॥

इति श्रीस्कन्दपुराणोक्तं संकष्टचतुर्थीव्रतम् ।

ऋषिपञ्चमीव्रत-कथा

सिताश्व उवाच

श्रुतानि देवदेवेश व्रतानि सुबहूनि च ।
साम्प्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम् ॥ १ ॥

ब्रह्मोवाच

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं सर्वपापहरं परम् ॥ २ ॥
येन चीर्णेन राजेन्द्र नरकं नैव पश्यति ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ ३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैदर्भे च द्विजवरो उत्तङ्को नाम नामतः ।
तस्य भार्या सुशीलेति पतिव्रतपरायणा ॥ ४ ॥
तस्या अपत्ययुगलं पुत्रो हि सुविभूषणः ।
अधीतवान् सुतस्तस्य वेदान् साङ्गपदक्रमान् ॥ ५ ॥
समाने च कुले तेन सुता चापि विवाहिता ।
विवाहितैव सा दैवाद् वैधव्यं प्राप सत्तम ॥ ६ ॥
सतीत्वं पालयन्ती सा आस्ते निजपितुर्गृहे ।
तस्या दुःखेन संतप्तः सुतं संस्थाप्य वेश्मनि ॥ ७ ॥
गङ्गातीरवनं प्राप्तः सकलत्रस्तया सह ।
स तत्राध्यापयामास शिष्यान् वेदं द्विजोत्तमः ॥ ८ ॥
सुता च कुरुते तस्य पितुः शुश्रूषणं परम् ।
पितुः शुश्रूषणं कृत्वा परिश्रान्ता कदाचन ॥ ९ ॥
निशीथे किल संसुप्ता कृमिराशिरजायत ।
तथाविधां च तां दृष्ट्वा विवस्त्रां प्रस्तरस्थिताम् ॥ १० ॥
शिष्या निवेदयामासुस्तन्मातुः करुणान्विताः ।
न जानीमो वयं किंचिद् देवीं साध्वीं तथाविधाम् ॥ ११ ॥
कृमिराशिमयी जाता मातः सम्प्रति दृश्यते ।
वज्रपातसदृशं तच्छ्रुत्वा शिष्यैरुदीरितम् ॥ १२ ॥
सा भ्रान्तमानसा शीघ्रं तत्समीपमुपागमत् ।
सा तां तथाविधां दृष्ट्वा विललाप सुदुःखिता ॥ १३ ॥
उरश्च ताडयामास सुतरां मोहमाप सा ।
क्षणेन प्राप्तचैतन्यां तामुत्थाप्य प्रमृज्य च ॥ १४ ॥
समालम्ब्य च बाहुभ्यां निन्ये तत्पितुरन्तिकम् ।
स्वामिन् कथय मे साध्वी केन दुष्कृतकर्मणा ॥ १५ ॥
निशीथे सम्प्रसुप्तेयं जायते कृमिसंकुला ।
एतच्छ्रुत्वा ततो वाक्यमृषिर्ध्यानपरायणः ॥ १६ ॥
ज्ञात्वा निवेदयामास तस्याः प्राग्जन्मचेष्टितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषिरुवाच

प्रागियं सप्तमेऽतीते जन्मनि ब्राह्मणी ह्यभूत् ॥ १७ ॥
रजस्वला च संजाता भाण्डादीन्यस्पृशत् तदा ।
अस्यास्तु पाप्मना तेन जायते कृमिवद् वपुः ॥ १८ ॥
रजस्वलायाः पापेन युक्ता भवति सानघे ।
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ॥ १९ ॥
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ।
तदा तया सखीसंगाद् व्रतं दृष्ट्वावमानितम् ॥ २० ॥
दृष्टव्रतप्रभावेण जाता द्विजकुलेऽमले ।
अवमानाद् व्रतस्यास्य कृमिराशिमयीऽधुना[१] ॥ २१ ॥
एतत् ते कथितं सर्वं कारणं दुष्कृतस्य च ।

सुशीलोवाच

दर्शनादपि यस्यास्य विप्राणां निर्मले कुले ॥ २२ ॥
जन्म युष्मद्विधानां हि जायते ब्रह्मतेजसाम् ।
अवज्ञया प्रजायन्ते निशीथे कृमिराशयः ॥ २३ ॥
महाश्चर्यकरं नाथ तद् व्रतं कथयस्व मे ।

ऋषिरुवाच

सुशीले शृणु तत् सम्यग् व्रतानामुत्तमं व्रतम् ।
येन चीर्णेन सहसा पापादस्मात् प्रमुच्यते ॥ २४ ॥
दुःखत्रयाच्च मुच्येत नारी सौभाग्यमाप्नुयात् ।
कल्याणानि विवर्धन्ते सम्पदश्च निरापदः ॥ २५ ॥
नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी ।
नद्यादिषु तदा स्नात्वा कृत्वा नियममेव च ॥ २६ ॥
विधाय नित्यकर्माणि गत्वा द्वारवतीमृषीन्[२] ।
स्नापयेद् विधिवद् भक्त्या पञ्चामृतरसैः शुभैः ॥ २७ ॥

---

१. अलोप आर्षः । २. गृहमित्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चन्दनागुरुकर्पूरैर्विलिप्य च सुगन्धिभिः ।
पूजयेद् विविधैः पुष्पैर्गन्धधूपादिदीपकैः ॥ २८ ॥
समाच्छाद्य शुभैर्वस्त्रैः सोपवीतैर्यथाविधि ।
ततो नैवेद्यसम्पन्नमर्घ्यं दद्याच्छुभैः फलैः ॥ २९ ॥
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रस्तु गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः ॥ ३० ॥
गृह्णन्त्वर्घ्यं मया दत्तं तुष्टा भवत मे सदा ।
श्रोतव्यमिदमाख्यानं शाकाहारं प्रकल्पयेत् ॥ ३१ ॥
स्थातव्यं ब्रह्मचर्येण ऋषिध्यानपरायणैः ।
अनेन विधिना सम्यग् व्रतमेतत् समाचरेत् ॥ ३२ ॥
तस्य तज्जायते पुण्यं सर्वतीर्थेषु यत् फलम् ।
सर्वदानेषु यत् पुण्यं तदस्य व्रतचारणात् ॥ ३३ ॥
कुरुते या व्रतं चैतत् सा नारी सुखभागिनी ।
रूपलावण्यसंयुक्ता पुत्रपौत्रादिसंयुता ॥ ३४ ॥
इह लोके सदैव स्यात् परत्राप्यक्षया गतिः ।
व्रतस्यास्य प्रभावेण जातिं स्मरति पौर्विकीम् ॥ ३५ ॥

इति श्रीहेमाद्रिरचिते चतुर्वर्गचिन्तामणौ व्रतखण्डे ब्रह्माण्डपुराणोक्ता ऋषिपञ्चमीव्रत-कथा समाप्ता ।

★

अनन्तव्रत-कथा

सूत उवाच

अरण्ये वर्तमानास्ते पाण्डवा दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य तमब्रुवन् ॥ १ ॥

युधिष्ठिर उवाच

अहं दुःखीह संजातो भ्रातृभिः परिवारितः ।
कथं मुक्तिर्वदास्माकमनन्ताद् दुःखसागरात् ॥ २ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कं देवं पूजयित्वा वै राज्यं प्राप्स्याम्यनुत्तमम् ।
अथवा किं व्रतं कुर्यां त्वत्प्रसादाद् भवेद्धितम् ॥ ३ ॥

श्रीकृष्ण उवाच

अनन्तव्रतमस्त्येकं सर्वपापहरं शुभम् ।
सर्वकामप्रदं नृणां स्त्रीणां चैव युधिष्ठिर ॥ ४ ॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत् ।
तस्यानुष्ठानमात्रेण सर्वपापं व्यपोहति ॥ ५ ॥

युधिष्ठिर उवाच

कृष्ण कोऽयमनन्तेति प्रोच्यते यस्त्वया विभो ।
किं शेषनाग आहोस्विदनन्तस्तक्षकः स्मृतः ॥ ६ ॥
परमात्माथवानन्त उताहो ब्रह्म गीयते ।
क एषोऽनन्तसंज्ञो वै तथ्यं मे ब्रूहि केशव ॥ ७ ॥

श्रीकृष्ण उवाच

अनन्त इत्यहं पार्थ मम रूपं निबोध तत् ।
आदित्यप्रचचारेण यः काल इति पठ्यते ॥ ८ ॥
कलाकाष्ठामुहूर्तादिदिनरात्रिशरीरवान् ।
पक्षमासर्तुवर्षादियुगकालव्यवस्थया ॥ ९ ॥
योऽयं कालो मयाऽऽख्यातः सोऽनन्त इति कीर्त्यते ।
सोऽहं कृष्णोऽवतीर्णोऽत्र भूभारोत्तारणाय च ॥ १० ॥
दानवानां वधार्थाय वसुदेवकुलोद्भवम् ।
अनन्तं विद्धि मां पार्थ कृष्णं विष्णुं हरिं शिवम् ॥ ११ ॥
अनादिमध्यनिधनं सर्वव्यापिनमीश्वरम् ।
विश्वरूपं महाकालं सृष्टिसंहारकारकम् ॥ १२ ॥
प्रत्ययार्थं मया रूपं फाल्गुनाय प्रदर्शितम् ।
पूर्वमेव महाबाहो योगिध्येयमनुत्तमम् ॥ १३ ॥
विश्वरूपमनन्तं च यस्मिन्निन्द्राश्चतुर्दश ।
वसवो द्वादशादित्या रुद्रा एकादश स्मृताः ॥ १४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तर्षयः समुद्राश्च पर्वताः सरितो द्रुमाः ।
नक्षत्राणि दिशो भूमिः पातालं भूर्भुवादिकम् ।
मा कुरुष्वात्र संदेहं सोऽहं पार्थ न संशयः ॥ १५ ॥

युधिष्ठिर उवाच

अनन्तव्रतमाहात्म्यं विधिं वद विदां वर ।
किं पुण्यं किं फलं चास्य किं दानं कस्य पूजनम् ॥ १६ ॥
केन चादौ पुरा चीर्णं मर्त्ये केन प्रकाशितम् ।
एवं सविस्तरं सर्वं ब्रूह्यनन्तव्रतं मम ॥ १७ ॥

श्रीकृष्ण उवाच

आसीत् पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः ।
वसिष्ठगोत्रसम्भूतः सुरूपां स भृगोः सुताम् ॥ १८ ॥
दीक्षानाम्नीं चोपयेमे वेदोक्तविधिना नृप ।
तस्याः कालेन संजाता दुहितानन्तलक्षणा ॥ १९ ॥
शीलानाम्नी सुशीला सा वर्द्धते पितृवेश्मनि ।
माता च तस्याः कालेन ज्वरदाहेन पीडिता ॥ २० ॥
विनष्टा सा नदीतीरे ययौ स्वर्गं पतिव्रता ।
सुमन्तुस्तु ततोऽन्यां च धर्मपुंसः सुतां पुनः ॥ २१ ॥
उपयेमे विधानेन दुश्शीलां नाम नामतः ।
दुश्शीलां कर्कशां चण्डीं नित्यं कलहकारिणीम् ॥ २२ ॥
सापि शीला पितुर्गेहे गृहार्चनपरा बभौ ।
कुड्यस्तम्भबहिर्द्वारदेहलीतोरणादिषु ॥ २३ ॥
वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः ।
स्वस्तिकैः शङ्खपद्मैश्च अर्चयन्ति पुनः पुनः ॥ २४ ॥
एवं सा वर्द्धते शीला पितृवेश्मनि मङ्गला ।
ततः काले बहुतिथे कौमारवशवर्तिनी ॥ २५ ॥
पित्रा दृष्टा तदा तेन स्त्रीचिह्ना यौवने स्थिता ।
तां दृष्ट्वा चिन्तयामास नराननुगुणान् भुवि ॥ २६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कस्मै देया मया कन्या विचार्य्येति सुदुःखितः ।
एतस्मिन्नेव काले तु मुनिर्वेदविदां वरः ॥ २७ ॥
कन्यार्थी चागतः श्रीमान् कौण्डिन्यो मुनिसत्तमः ।
उवाच रूपसम्पन्नां त्वदीयां तनयां वृणे ।
पिता ददौ द्विजेन्द्राय कौण्डिन्याय शुभे दिने ॥ २८ ॥
गृह्योक्तविधिना पार्थ विवाहमकरोत् तदा ।
निवर्त्यौद्वाहिकं सर्वं प्रोक्तवान् कर्कशां द्विजः ॥ २९ ॥
किञ्चिद्दायादिकं देयं जामातृपारितोषिकम् ।
तच्छ्रुत्वा कर्कशा क्रुद्धा प्रोत्सार्य गृहमण्डनम् ॥ ३० ॥
पेटायां सुस्थिरं बद्ध्वा पितृवेश्मनि सा ययौ ।
कौण्डिन्योऽपि विवाह्यैनां पथि गच्छञ्छनैः शनैः ॥ ३१ ॥
शीलां सुशीलामादाय नवोढां गोरथेन हि ।
ददर्श यमुनां पुण्यां तामुत्तीर्य तटे रथम् ॥ ३२ ॥
संस्थाप्यावश्यकं कर्त्तुं गतः शिष्यान् नियुज्य वै ।
मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे ॥ ३३ ॥
ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम् ।
चतुर्दश्यामर्चयन्तं भक्त्या देवं जनार्दनम् ॥ ३४ ॥
उपगम्य शनैः शीला पप्रच्छ स्त्रीकदम्बकम् ।
आर्याः किमेतन्मे ब्रूत किं नाम व्रतमीदृशम् ॥ ३५ ॥
ता ऊचुर्योषितस्तां तु शीलां शीलविभूषणाम् ।
अनन्तव्रतमेतद्धि व्रतेऽनन्तः प्रपूज्यते ॥ ३६ ॥
साब्रवीदहमप्येतत् करिष्ये व्रतमुत्तमम् ।
विधानं कीदृशं तत्र किं दानं कश्च पूज्यते ॥ ३७ ॥

स्त्रिय ऊचुः

शीले सदन्नप्रस्थस्य पुन्नाम्ना संस्कृतस्य च ।
अर्द्धं विप्राय दातव्यमर्द्धमात्मनि भोजनम् ॥ ३८ ॥
शक्त्या च दक्षिणां दद्याद् वित्तशाठ्यविवर्जितः ।
कर्त्तव्यं सत्सरित्तीरे विधिनानेन मानिनी ॥ ३९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शेषं कुशमयं कृत्वा वंशपात्रे निधाय च ।
स्नात्वानन्तं समभ्यर्च्य मण्डले धूपदीपकैः ॥ ४० ॥
गन्धैः पुष्पैः सनैवेद्यैर्नानापक्वान्नसंयुतैः ।
तस्याग्रतो दृढं न्यस्य कुङ्कुमाक्तं सुदोरकम् ॥ ४१ ॥
चतुर्दशग्रन्थियुतं गन्धाद्यैरर्चयेच्छुभैः ।
ततस्तु दक्षिणे पुंसां स्त्रीणां वामे करे न्यसेत् ॥ ४२ ॥
'अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव ।
अनन्तरूपे विनियोजयस्व अनन्तरूपाय नमो नमस्ते' ॥ ४३ ॥
अनेन दोरकं बद्ध्वा कथां श्रुत्वा हरेरिमाम् ।
ध्यात्वा नारायणं देवमनन्तं विश्वरूपिणम् ॥ ४४ ॥
भुक्त्वा चान्ते व्रजेद् वेश्म भद्रे प्रोक्तं व्रतं तव ॥ ४५ ॥

श्रीकृष्ण उवाच

एवमाकर्ण्य राजेन्द्र प्रहृष्टेनान्तरात्मना ।
सापि चक्रे व्रतं शीला करे बद्ध्वा सुदोरकम् ॥ ४६ ॥
पाथेयमर्धं विप्राय दत्त्वा भुक्त्वा स्वयं ततः ।
पुनर्जगाम संहृष्टा गोरथेन स्वकं गृहम् ॥ ४७ ॥
भर्त्रा सहैव शनकैः प्रत्ययस्तत्क्षणादभूत् ।
तेनानन्तव्रतेनास्या बभौ गोधनसंकुलम् ॥ ४८ ॥
गृहाश्रमं श्रिया जुष्टं धनधान्यसमन्वितम् ।
आकुलं व्याकुलं रम्यं सर्वदातिथिपूजनैः ॥ ४९ ॥
सापि माणिक्यकाञ्चीभिर्मुक्ताहारविभूषिता ।
देवाङ्गनेव सम्पन्ना सावित्रीप्रतिमाभवत् ॥ ५० ॥
कदाचिदुपविष्टाया दृष्टो बद्धः सुदोरकः ।
शीलाया हस्तमूले तु भर्त्रा तेन द्विजन्मना ॥ ५१ ॥
किमिदं दोरकं शीले मम वश्याय कल्पितम् ।
धृतं सुदोरकं त्वेतत् किमर्थं ब्रूहि तत्त्वतः ॥ ५२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शीलोवाच

यस्य प्रसादात् सकला धनधान्यादिसम्पदः ।
लभ्यन्ते मानवैश्चापि सोऽनन्तोऽयं मया धृतः ॥ ५३ ॥
शीलायास्तद् वचः श्रुत्वा भर्त्रा तेन द्विजन्मना ।
श्रीमदान्धेन कौरव्य साक्षेपं त्रोटितस्तदा ॥ ५४ ॥
कोऽनन्त इति मूढेन जल्पता पापकारिणा ।
क्षिप्तो ज्वालाकुले वह्नौ हा हा कृत्वा प्रधावती ॥ ५५ ॥
शीला गृहीत्वा तत् सूत्रं क्षीरमध्ये समाक्षिपत् ।
तेन कर्मविपाकेन तस्य श्रीर्विलयं गता ॥ ५६ ॥
गोधनं तस्करैर्नीतं गृहं दग्धं धनं गतम् ।
यद् यथैवागतं गेहे तत् तथैव पुनर्गतम् ॥ ५७ ॥
स्वजनैः कलहो नित्यं बन्धुभिस्तर्जनं तथा ।
न कश्चिद् वदते लोकस्तेन सार्द्धं युधिष्ठिर ॥ ५८ ॥
शरीरेणातिसंतप्तो मनसाप्यत्यन्तदुःखितः ।
निर्वेदं परमं प्राप्तः कौण्डिन्यः प्राह तां मुनिः ॥ ५९ ॥

कौण्डिन्य उवाच

शीले ममेदमुत्पन्नं सहसा शोककारणम् ।
येनातिदुःखमस्माकं जातः सर्वधनक्षयः ॥ ६० ॥
स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते ।
शरीरे नित्यसंतापः खेदश्चेतसि दारुणः ॥ ६१ ॥
जानासि दुर्नयः कोऽत्र किं कृत्वा सुकृतं भवेत् ।
प्रत्युवाचाथ तं शीला सुशीला शीलमण्डना ॥ ६२ ॥

शीलोवाच

प्रायोऽनन्तकृताक्षेपपापसम्भवजं फलम् ।
भविष्यति महाभाग तदर्थं यत्नमाचर ॥ ६३ ॥
एवमुक्तः स विप्रर्षिर्जगाम मनसा हरिम् ।
निर्वेदं निर्जगामाथ कौण्डिन्यः प्रयतो वनम् ॥ ६४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तपसे कृतसंकल्पो वायुभक्षी द्विजोत्तमः ।
मनसा ध्याय चानन्तं क्व द्रक्ष्यामि च तं विभुम् ॥ ६५ ॥
यस्य प्रसादात् सम्प्राप्तमाक्षेपान्निधनं गतम् ।
धनादिकं ममातीव सुखदुःखप्रदायकम् ॥ ६६ ॥
एवं संचिन्तयन् सोऽथ बभ्राम विजने वने ।
तत्रापश्यन्महाचूतं पुष्पितं फलितं यथा ॥ ६७ ॥
वर्जितं पक्षिसंघातैः कीटकोटिवृतं तथा ।
तमपृच्छत् त्वयानन्तः क्वचिद् दृष्टो महातरो ॥ ६८ ॥
ब्रूहि सौम्य ममातीव दुःखं चेतसि वर्तते ।
सोऽब्रवीद् भद्र नानन्तं क्वचित् पश्यामि वा द्विज ॥ ६९ ॥
एवं निराकृतस्तेन स जगामाथ दुःखितः ।
क्व द्रक्ष्यामीति गच्छन् स गामपश्यत् सवत्सकाम् ॥ ७० ॥
तृणमध्ये च धावन्तीमितश्चेतश्च पाण्डव ।
अब्रवीद् धेनुके ब्रूहि यद्यनन्तस्त्वयेक्षितः ॥ ७१ ॥
सा चोवाचाथ कौण्डिन्यं नानन्तं वेद्म्यहं द्विज ।
ततो व्रजन् ददर्शाग्रे गोवृषं शाद्वले स्थितम् ।
दृष्ट्वा पप्रच्छ गोस्वामिन्ननन्तो वीक्षितस्त्वया ॥ ७२ ॥
गोवृषस्तमुवाचेदं नानन्तो वीक्षितो मया ।
ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीद्वयम् ॥ ७३ ॥
अन्योन्यजलकल्लोलैर्वीचिपर्यन्तसंगतम् ।
छन्नकिंजल्ककह्लारकमलोत्पलमण्डितम् ॥ ७४ ॥
सेवितं भ्रमरैर्हंसैश्चक्रैः कारण्डवैर्बकैः ।
ते चापृच्छद् द्विजोऽनन्तो भवद्भ्यां नोपलक्षितः ॥ ७५ ॥
ऊचतुस्ते पुष्करिण्यौ नानन्तो वीक्षितो द्विज ।
ततो व्रजन् ददर्शाग्रे गर्दभं कुञ्जरं तथा ॥ ७६ ॥
तावप्युक्तौ द्विजेनेत्थं नेति ताभ्यां निवेदितम् ।
एवं सम्पृच्छ्य नष्टाशस्तत्रैव निषसाद ह ॥ ७७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कौण्डिन्यो विह्वलीभूतो निराशो जीवने नृप ।
दीर्घमुष्णं च निःश्वस्य पपात भुवि भारत ।। ७८ ।।
प्राप्य संज्ञामनन्तेति जल्पन्नुत्थाय स द्विजः ।
नूनं त्यक्ष्याम्यहं प्राणानिति संकल्प्य चेतसि ।। ७९ ।।
उत्थायोद्बुध्य वृक्षेऽस्मिंस्तावद् भरतसत्तम ।
कृपयानन्तदेवोऽपि प्रत्यक्षः समजायत ।। ८० ।।
वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् ।
प्रगृह्य दक्षिणे पाणौ गुहायां प्रविवेश्य तम् ।। ८१ ।।
स्वां पुरीं दर्शयामास दिव्यनारीनरैर्युताम् ।
तस्यां विविधमात्मानं दिव्यसिंहासने शुभे ।। ८२ ।।
पार्श्वस्थे शङ्खचक्रं च गदागरुडशोभितम् ।
दर्शयामास विप्राय स्वीयं रूपमनन्तकम् ।। ८३ ।।
विभूतिभेदैश्चानन्तैरनन्तममितौजसम् ।
तं दृष्ट्वा तादृशं रूपमनन्तमपराजितम् ।। ८४ ।।
वेद्यमाने जगादोच्चैर्जयशब्दपुरस्सरम् ।
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।। ८५ ।।
त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव ।
तच्छ्रुत्वानन्तदेवेशः प्राह सुस्निग्धया गिरा ।। ८६ ।।
मा भैस्त्वं ब्रूहि विप्रेन्द्र यत् ते मनसि वर्तते ।

कौण्डिन्य उवाच

मया भूत्यावलिप्तेन त्रोटितोऽनन्तदोरकः ।
तेन कर्मविपाकेन भूतिर्मे प्रलयं गता ।। ८७ ।।
स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते ।
तस्य पापस्य मे शान्तिं कारुण्याद् वक्तुमर्हसि ।। ८८ ।।

श्रीकृष्ण उवाच

तच्छ्रुत्वानन्तदेवस्तमुवाच द्विजसत्तमम् ।

श्रीअनन्त उवाच

स्वगृहं गच्छ कौण्डिन्य मा विलम्बं कुरु द्विज ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चरानन्तव्रतं भक्त्या नव वर्षाणि पञ्च च ॥ ८९ ॥
सर्वपापविशुद्धात्मा प्राप्स्यसे सिद्धिमुत्तमाम् ।
पुत्रान् पौत्रान् समुत्पाद्य भुक्त्वा भोगान् यथेप्सितान् ॥ ९० ॥
अन्ते मत्स्मरणं प्राप्य मामुपैष्यस्यसंशयम् ।
अन्यच्च ते वरं दद्मि सर्वलोकोपकारकम् ॥ ९१ ॥
इदमाख्यानकवरं शीलानन्तव्रतादिकम् ।
पठिष्यति नरो यस्तु प्राप्स्यति परमां गतिम् ॥ ९२ ॥
गच्छ विप्र गृहं शीघ्रं यथा येनागतो ह्यसि ॥ ९३ ॥

कौण्डिन्य उवाच

स्वामिन् पृच्छामि मे ब्रूहि किंचित् कौतूहलं मया ।
अरण्ये भ्रमता दृष्टं न तद् वेद्मि जगद्गुरो ॥ ९४ ॥
स चूतवृक्षः कस्तत्र का गौः को वृषभस्तथा ।
कमलोत्पलकह्लारैः शोभितं सुमनोहरम् ॥ ९५ ॥
मया दृष्टं महारण्ये तत् किं पुष्करिणीद्वयम् ।
कः खरः कुञ्जरः कोऽसौ कोऽसौ वृद्धो द्विजोत्तमः ॥ ९६ ॥

श्रीअनन्त उवाच

स चूतवृक्षो विप्रोऽसौ विद्यावेदविशारदः ।
सोऽर्थितोऽपि न च प्रादाच्छिष्येभ्यस्तरुतां गतः ॥ ९७ ॥
सा गौर्वसुन्धरा दृष्टा सफला या त्वया द्विज ।
वृषो धर्मस्त्वया दृष्टः शाद्वलं सत्यमास्थितः ॥ ९८ ॥
धर्माधर्मव्यवस्थानं तच्च पुष्करिणीद्वयम् ।
ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ ते परस्परम् ॥ ९९ ॥
धर्माधर्मादि यत् किंचित् तन्निवेदयतो मिथः ।
विप्राय न क्वचिद् दत्तमतिथौ दुर्बलेऽपि वा ॥ १०० ॥
भिक्षा दत्ता न वार्थिभ्यस्तेन पापेन कर्मणा ।
वीचिकल्लोलमालाभिर्गच्छतस्ते परस्परम् ॥ १०१ ॥
खरः क्रोधस्त्वया दृष्टः कुञ्जरो मद उच्यते ।
ब्राह्मणोऽसावनन्तोऽहं गुहासंसारगह्वरम् ॥ १०२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत।
स्वप्नप्रायं स तद् दृष्ट्वा ततः स्वगृहमागतः॥ १०३॥
कृत्वानन्तव्रतं सम्यङ् नव वर्षाणि पञ्च च।
भुक्त्वा सर्वमनन्तेन यथोक्तं पाण्डुनन्दन॥ १०४॥
अन्ते वै मरणं प्राप्य गतोऽनन्तपुरं द्विजः॥ १०५॥
तथा त्वमपि राजर्षे कथां शृण्वन् व्रतं कुरु।
प्राप्स्यसे चिन्तितं सर्वमनन्तस्य वचो यथा॥ १०६॥
यद्वच्चतुर्दशे वर्षं फलं प्राप्तं द्विजन्मना।
वर्षैकेन तदाप्नोति कृत्वोपाख्यानकं व्रतम्॥ १०७॥
एतत् ते कथितं भूप व्रतानामुत्तमं व्रतम्।
यत् कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥ १०८॥
येऽपि शृण्वन्ति सततं पठ्यमानं पठन्ति च।
तेऽपि पापविनिर्मुक्ताः प्राप्स्यन्ति च हरेः पुरम्॥ १०९॥

संसारगह्वरगुहासु सुखं विहर्तुं
वाञ्छन्ति ये कुरुकुलोद्भव शुद्धसत्त्वाः।
सम्पूज्य च त्रिभुवनेशमनन्तदेवं
बध्नन्ति दक्षिणकरे वरदोरकं ते॥ ११०॥

इति श्रीभविष्योत्तरपुराणे अनन्तव्रतकथा समाप्ता।

★

(माघकृष्ण) संकष्टचतुर्थीव्रत-कथा

सूत उवाच

अरण्ये वर्तमानं तं पाण्डुपुत्रं युधिष्ठिरम्।
सबान्धवं सुखासीनं प्रययौ व्यास आदरात्॥ १॥
तं दृष्ट्वा मुनिशार्दूलं व्यासं प्रत्यापयौ नृपः।
मधुपर्कं च सार्घ्यं स दत्त्वा तस्मै उवाच तम्॥ २॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युधिष्ठिर उवाच

अद्य मे सफलं जन्म भवताऽऽगमने कृते ।
यत् संकष्टं हि संजातं वने मम निवासिनः ॥ ३ ॥
तत् सर्वं विलयं जातं भवतो दर्शनेन हि ।
आत्मानं साधु मन्येऽहं राज्यतृष्णापराङ्मुखम् ॥ ४ ॥
दुःखितं मां पुनः स्वामिन् राज्यभ्रष्टं वने स्थितम् ।
एते भीमादयः सर्वे बान्धवा व्यथयन्ति भोः ॥ ५ ॥
दुराधर्षाः सुवीर्या हि मच्छासनविधौ रताः ।
इयं तु द्रौपदी साध्वी राजपुत्री पतिव्रता ॥ ६ ॥
राज्योपभोग्ययोग्या साप्यथ दुःखोपभोगिनी ।
मया च किं कृतं व्यास पूर्वं कष्टानुजीविना ॥ ७ ॥
दायादैर्लुण्ठितं राज्यं द्यूतछद्मरतैस्तथा ।
पराजिता वयं ब्रह्मन् सुहृद्भिर्बन्धुभिस्तथा ॥ ८ ॥
वनं प्रस्थापिता दूतैरिदमूचुस्तथैव च ।
कुर्वन्तु गमनं शीघ्रं वनाय भवदादयः ॥ ९ ॥
इत्थं निराकृताः स्वामिन् यदा तद् वनमागताः ।
अहं तदा प्रभृत्यहीन् न द्रक्ष्यामि भवादृशान् ॥ १० ॥
यद्यस्ति व्रतमेकं हि सर्वसंकष्टनाशनम् ।
तद् व्रतं कथय ब्रह्मन्ननुग्राह्योऽस्मि सुव्रत ॥ ११ ॥
इत्युक्तवन्तं राजानं सर्वसंकष्टनाशनम् ।
उवाच प्रीणयन् व्यासो धर्मजं व्रतमुत्तमम् ॥ १२ ॥

व्यास उवाच

नास्ति भूमण्डले राजंस्त्वत्समो धर्मतत्परः ।
कथयामि व्रतं तेऽद्य व्रतानामुत्तमोत्तमम् ॥ १३ ॥
संकष्टनाशनं नित्यं शुभदं फलदं भुवि ।
यत्कर्तुः सर्वकार्याणां निष्पत्तिर्जायते ध्रुवम् ॥ १४ ॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
प्रोषिता या पुरन्ध्री च करोति व्रतमुत्तमम् ॥ १५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ईप्सितं लभते सर्वं पतिना सह मोदते।
संकष्टेऽपि यदाक्षिप्तो मानवो ग्रहपीडितः॥ १६॥
साम्राज्ये दीक्षितो नित्यं मन्त्रिभिः परिवारितः।
सुहृद्भिर्बन्धुभिश्चैव तथा पुत्रैः समन्वितः॥ १७॥
तस्य तु प्रियकर्त्री च पत्नी गुणवती प्रिया।
नाम्ना रत्नावलीत्यासीत् पतिव्रतपरायणा॥ १८॥
तयोः परस्परं प्रीतिरभवच्च गुणाश्रय।
कदाचिद् दैवयोगेन हृतं राज्यं च वैरिभिः॥ १९॥
कोशो बलं चापहृतं विध्वस्तो बन्धुभिः सह।
रत्नावल्या तया साध्व्या निर्गतो भूमिवल्लभः॥ २०॥
वने क्षुधार्तः कृशितो ह्येकवासास्तृषार्दितः।
इतस्ततश्चरन् राजन्नातपेनातिपीडितः॥ २१॥
एकाकी वनमासाद्य पत्न्या सार्द्धं युधिष्ठिर।
सूर्ये चास्ताचलं याते अरण्ये च शिवार्दिते॥ २२॥
व्याघ्राश्च चुक्रुशुस्तत्र पर्जन्योऽपि ववर्ष ह।
कण्टकैः क्लेशिता राज्ञी दुःखादाक्रन्दपीडिता॥ २३॥
तां विलोक्य नृपश्रेष्ठो दुःखेनैव तु पीडितः।
ततः प्रभातसमये मार्कण्डेयं महामुनिम्॥ २४॥
ददर्श राजा तत्रैव विस्मयाविष्टमानसः।
उपगम्य शनैस्तं तु दण्डवत् पतितो भुवि॥ २५॥
अब्रवीद् वचनं राजा मार्कण्डेयं महामुनिम्।
किं कृतं हि मया स्वामिन् दुष्कृतं कथयस्व तत्॥ २६॥
केन कर्मविपाकेन राज्यलक्ष्मीः पराङ्मुखी।

मार्कण्डेय उवाच

शृणु राजन् प्रवक्ष्यामि यत् कृतं पूर्वजन्मनि॥ २७॥
पूर्वं हि लुब्धकश्चासीर्गतोऽसि गहनं वनम्।
मृगशार्दूलशशकान् विनिघ्नन् परितो वने॥ २८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मिन् रात्रौ भ्रमन् राजंश्चतुर्थ्यां माघकृष्णके ।
दृष्टं शुभं च कृष्णायास्तटाकं पृथुनिर्मलम् ॥ २९ ॥
तत्तीरे नागकन्यानां समूहं रक्तवाससाम् ।
गणेशं पूजयन्तीनां दृष्टवान् निरतं व्रते ॥ ३० ॥
उपगम्य शनैस्तत्र पृष्टास्तास्तु त्वया विभो ।
आर्याः किमेतन्मे सर्वं कथयध्वं हि तत्त्वतः ॥ ३१ ॥

नागकन्या ऊचुः

पूजयामो गणपतिं व्रतं सिद्धिप्रदायकम् ।
शान्तिदं पुष्टिदं नित्यं सर्वव्याधिविनाशनम् ॥ ३२ ॥
पुनः पृष्टं त्वया तत्र किं दानं पूज्यतेऽत्र कः ।

स्त्रिय ऊचुः

यदा चोत्पद्यते भक्तिर्माघे मासि गणाधिपम् ॥ ३३ ॥
कृष्णायां च चतुर्थ्यां वै रक्तपुष्पैः प्रपूजयेत् ।
धूपैर्दीपैश्च नैवेद्यैरन्यैर्भक्तिसमाहृतैः ॥ ३४ ॥
विधिवन्मोदकान् कृत्वा पूरिका घृतपाचिताः ।
नैवेद्यं षड्रसं सर्वं गणेशाय निवेदयेत् ॥ ३५ ॥
ततो गृहीत्वा राजेन्द्र त्वया संकष्टनाशनम् ।
व्रतं कृतं भक्तिपूर्वं साङ्गं तस्य प्रभावतः ॥ ३६ ॥
अभवद् धनधान्यं ते पुत्रपौत्रसमन्वितम् ।
कस्मिंश्चित् समये राजन् धनमत्तेन सिद्धिदम् ॥ ३७ ॥
विस्मृतं तद् व्रतं नैव कृतं यत्नेन भूतिदम् ।
ततः प्राप्तं हि पञ्चत्वमायुषोऽन्ते त्वया विभो ॥ ३८ ॥
तत्प्रभावाद् राजकुले विशाले प्राप्तमुत्तमम् ।
त्वया जन्म नृपश्रेष्ठ राज्यं प्राप्तं तथा विभो ॥ ३९ ॥
सुहृन्मित्रप्रियायुक्तः प्राप्तोऽसि विपुलं वसु ।
कृतावज्ञा व्रतस्यान्तस्तत प्राप्तं फलमीदृशम् ॥ ४० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

राजोवाच

अधुना क्रियते स्वामिन् कथ्यतां मम सुव्रतम् ।
यत् कृत्वा सकलं राज्यं प्राप्यते च मया पुनः ॥ ४१ ॥

ऋषिरुवाच

व्रतसंकल्पमाशु त्वं कुरु चादौ नृपोत्तम ।
प्राप्स्यसि त्वं हि राज्यं च संदेहं मा कुरु प्रभो ॥ ४२ ॥
इत्युक्त्वा स मुनिश्रेष्ठो ह्यन्तर्धानमगात् ततः ।
मुनेस्तद् वचनं श्रुत्वा व्रतसंकल्पमातनोत् ॥ ४३ ॥
राजाकरोन्मुनिप्रोक्तं सकलं तद् व्रतं शुभम् ।
आयाताः सकलास्तस्य मन्त्रिभृत्याश्च सैनिकाः ॥ ४४ ॥
समाययौ नृपश्रेष्ठस्तत्क्षणात् स्वयमेव हि ।
लब्ध्वा स्वकीयं राज्यं च गणेशस्य प्रसादतः ॥ ४५ ॥
बुभुजे मेदिनीं राजा पुत्रपौत्रसमन्वितः ।
तस्मात् त्वमपि राजेन्द्र कुरु संकष्टनाशनम् ॥ ४६ ॥
व्रतं सिद्धिप्रदं नृणां स्त्रीणां चैव विशेषतः ।

युधिष्ठिर उवाच

सविस्तरं व्रतं ब्रूहि कृपया कष्टनाशनम् ॥ ४७ ॥

व्यास उवाच

यदा संक्लेशितो राजन् दुःखैः संकष्टदारुणैः ।
पुमान् कृष्णचतुर्थ्यां तु तदा पूज्यो गणाधिपः ॥ ४८ ॥
श्रावणे बहुले पक्षे चतुर्थी स्याद् विधूदये ।
तस्मिन् दिने व्रतं ग्राह्यं संकष्टाख्यं युधिष्ठिर ॥ ४९ ॥
माघे वा कृष्णपक्षे तु चतुर्थी स्याद् विधूदये ।
तस्मिन् दिने व्रतं ग्राह्यं संकष्टाख्यं युधिष्ठिर ॥ ५० ॥
प्रातः शुचिर्भवेत् सम्यग् दन्तधावनपूर्वकम् ।
निराहारोऽद्य देवेश यावच्चन्द्रोदयो भवेत् ॥ ५१ ॥
भोक्ष्यामि पूजयित्वाहं गणेशं शरणं गतः ।
कृत्वैवमादौ संकल्पं स्नात्वा शुक्लतिलैः शुभैः ॥ ५२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आह्निकं तु विधायैवं पूजां च कुरु सुव्रत ।
यथाशक्त्या तु सौवर्णीं प्रतिमां च विधाय च ॥ ५३ ॥
सौवर्णे राजते ताम्रे मृण्मये वाथ शक्तितः ।
कुम्भे पुष्पैः फलैः पूर्णे देवं तत्रैव विन्यसेत् ॥ ५४ ॥
शुभे देशे न्यसेत् कुम्भं वस्त्रं तत्र निधाय च ।
पद्ममष्टदलं कृत्वा गन्धाद्यैः पूजयेत् ततः ॥ ५५ ॥
रक्तपुष्पैश्च धूपैश्च एभिर्नामपदैः पृथक् ।
आवाहनं गणेशाय आसनं विघ्ननाशिने ॥ ५६ ॥
पाद्यं लम्बोदरायेति अर्घ्यं चन्द्रार्धधारिणे ।
विश्वप्रियायाचमनं स्नानं च ब्रह्मचारिणे ॥ ५७ ॥
वक्रतुण्डायोपवीतं वस्त्रं सर्वप्रदाय च ।
चन्दनं रुद्रपुत्राय पुष्पं च गुणशालिने ॥ ५८ ॥
भवानीप्रियकर्त्रे च धूपं दद्याद् यथाविधि ।
दीपं रुद्रप्रियायेति नैवेद्यं विघ्ननाशिने ॥ ५९ ॥
ताम्बूलं सिद्धिदायेति फलं संकष्टनाशिने ।
इति नामपदैः पूजां कृत्वा मासयमाञ्छृणु ॥ ६० ॥
श्रावणे सप्तलड्डूकान् नभस्ये दधिभक्षणम् ।
आश्विने चोपवासं च कार्तिके दुग्धपानकम् ॥ ६१ ॥
मार्गशीर्षे निराहारं पौषे गोमूत्रपानकम् ।
तिलांश्च भक्षयेन्माघे फाल्गुने घृतशर्कराम् ॥ ६२ ॥
चैत्रे मासि पञ्चगव्यं दूर्वारसं तु माधवे ।
ज्येष्ठे घृतं पलं भोज्यमाषाढे मधुभक्षणम् ॥ ६३ ॥
इति मासयमान् कृत्वा नरो मुच्येत संकटात् ।
भुञ्जीयाद् वा तथा सप्तग्रासान् वा स्वेच्छया सुखम् ॥ ६४ ॥
अशक्तश्चेत् ततः सिद्धिर्भविष्यति न संशयः ।
एवं पूजा प्रकर्त्तव्या षोडशैरुपचारकैः ॥ ६५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नाना भक्ष्यादिसंयुक्तमुपहारं प्रकल्पयेत्।
मोदकान् कारयेद् राजंस्तिलजान् दशसंख्यकान्॥ ६६॥
देवाग्रे स्थापयेत् पञ्च पञ्च विप्राय दापयेत्।
पूजयित्वा तु तं विप्रं भक्तिभावेन देववत्॥ ६७॥
दक्षिणां च यथाशक्त्या दत्त्वा पञ्चैव मोदकान्।
साञ्जलिः श्रद्धया राजन्निमं स्तोत्रमुदीरयेत्॥ ६८॥
'संसारपीडाव्यथितं हि मां सदा
संकष्टभूतं सुमुख प्रसीद।
त्वं त्राहि मां नाशय कष्टसंघान्
नमो नमः कष्टविनाशनाय'॥ ६९॥
इति सम्प्रार्थ्य देवेशं चन्द्रायार्घ्यं निवेदयेत्।
ब्राह्मणान् भोजयेत् पश्चाद् गणेशप्रीतये सदा॥ ७०॥
स्वयं भुञ्जीत पञ्चैव मोदकान् बन्धुभिः सह।
अशक्तौ त्वेकमन्नं वा भुञ्जीयाद् दधिना[१] सह॥ ७१॥
अथवा भोजनं कार्यमेकवारं हि पाण्डव।
भूमिशायी जितक्रोधो लोभदम्भविवर्जितः॥ ७२॥
अनेनैव तु मन्त्रेण व्रती सम्यग् विधानतः।
सोपस्करां च प्रतिमामाचार्याय निवेदयेत्॥ ७३॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर।
व्रतेनानेन सुप्रीतो यथोक्तफलदो भव॥ ७४॥
उद्यापनं प्रकर्तव्यं चतुर्थ्यां माघकृष्णके।
गाणपत्यं सदाचारं सर्वशास्त्रविशारदम्॥ ७५॥
आचार्यं वरयेदादौ यथोक्तविधिनार्चयेत्।
एकविंशतिविप्रान् वै वस्त्रालंकारभूषणैः॥ ७६॥

---

१. आर्षप्रयोग।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूजयेद् गोहिरण्याद्यैर्मोदकैश्चैव होमयेत् ।
अष्टोत्तरसहस्रं तु शतं चाष्टाधिकं तथा ॥ ७७ ॥
अष्टाविंशतिरष्टौ वा वेदोक्तैस्तिलसर्पिषा ।
सपत्नीकं सुवर्णाद्यैर्गोभूवस्त्रादिभूषणैः ॥ ७८ ॥
छत्रं चोपानहौ दद्यात् कमण्डलुगृहादिभिः ।
आचार्यं पूजयेद् राजन् गणेशस्य तु तुष्टये ॥ ७९ ॥
एवं कृत्वा विधानेन प्रसन्नो नात्र संशयः ।
प्रतिमासं तु यः कुर्यात् त्रीण्यब्दान्येकमेव वा ॥ ८० ॥
अथवा जन्मपर्यन्तं तस्य दुःखं कदा च न ।
दारिद्र्यं न भवेत् तस्य संकष्टं न भवेदिह ॥ ८१ ॥
वत्सरान्ते द्वादश वै ब्राह्मणान् भोजयेत् ततः ।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ ८२ ॥
पुत्रार्थी लभते पुत्रं सौभाग्यं च सुवासिनी ।
राज्यार्थी लभते राज्यं सुखार्थी लभते सुखम् ॥ ८३ ॥
शृण्वन्ति ये व्रतमिदं शुभमीदृशं हि
ते वै सुखेन भुवि पूर्णमनोरथाः स्युः ।
नित्यं भवन्ति सुखिनो ललनाः पुमांसः
सत्पुत्रपौत्रधनधान्ययुताः पृथिव्याम् ॥ ८४ ॥
एवमुक्त्वा ततो व्यासस्तत्रैवान्तरधीयत ।
युधिष्ठिरस्तु तत् सर्वमकरोद् राजसत्तमः ॥ ८५ ॥
तेन व्रतप्रभावेण स्वराज्यं प्राप्तवान् नृपः ।
हत्वा रिपून कुरुक्षेत्रे स्वराज्यमलभन्नृपः ॥ ८६ ॥

इति श्रीनारदमहापुराणे माघकृष्णचतुर्थीसंकष्टहरगणपतिव्रतकथा समाप्ता ।

══ ★ ══

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीशिवरात्रिव्रत-कथा

लोमश उवाच

आसीत् पुरा महारौद्रश्चण्डो नाम दुरात्मवान् ।
क्रूरसंगो निष्कृतिको भूतानां भयवाहकः ॥ १ ॥
जालेन मत्स्यान् दुष्टात्मा घातयत्यनिशं खलु ।
भल्लैर्मृगाञ्छ्वापदांश्च कृष्णसारांश्च सल्लकान् ॥ २ ॥
खड्गांश्चैव च दुष्टात्मा दृष्ट्वा कांश्चिच्च पापवान् ।
पक्षिणोऽघातयत् क्रुद्धो ब्राह्मणांश्च विशेषतः ॥ ३ ॥
लुब्धको हि महापापो दुष्टो दुष्टजनप्रियः ।
भार्या तथाविधा तस्य पुष्कसस्य महाभया ॥ ४ ॥
एवं विहरतस्तस्य बहुकालोऽत्यवर्तत ।
गते बहुतिथे काले पापौघनिरतस्य च ॥ ५ ॥
निषङ्गे जलमादाय क्षुत्पिपासार्द्दितो भृशम् ।
एकदा निशि पापीयाञ्छ्रीवृक्षोपरि संस्थितः ॥ ६ ॥
कोलं हन्तुं धनुष्पाणिर्जाग्रच्चानिमिषेण हि ।
माघमासेऽसितायां वै चतुर्दश्यामथाग्रतः ॥ ७ ॥
मृगमार्गावलोकार्थी बिल्वपत्राण्यपातयत् ॥ ८ ॥
श्रीवृक्षपर्णानि बहूनि तत्र
स छेदयामास रुषान्वितोऽपि ।
श्रीवृक्षमूले परिवर्त्तमानो
लिङ्गं च तस्योपरि दुष्टभावः ॥ ९ ॥
ववर्ष गण्डूषजलं दुरात्मा
यदृच्छया तानि शिवे पतन्ति ।
श्रीवृक्षपर्णानि च दैवयोगा-
ज्जातं च सर्वं शिवपूजनं तत् ॥ १० ॥
गण्डूषवारिणा तेन स्नपनं च कृतं महत् ।
बिल्वपत्रैरसंख्यातैरर्चनं च महत् कृतम् ॥ ११ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अज्ञानेनापि भो विप्राः पुष्कसेन दुरात्मना।
माघमासेऽसिते पक्षे चतुर्दश्यां विधूदये ॥ १२ ॥
पुष्कसोऽथ दुराचारो वृक्षादवततार सः।
आगत्य जलसंकाशं मत्स्यान् हन्तुं प्रचक्रमे ॥ १३ ॥
लुब्धकस्यापि भार्याभून्नाम्ना चैव घनोदरी।
दुष्टा सा पापनिरता परद्रव्यापहारिणी ॥ १४ ॥
गृहान्निर्गत्य सायाह्ने पुरद्वारबहिःस्थिता।
वनमार्गं प्रपश्यन्ती पत्युरागमनेच्छया ॥ १५ ॥
चिराद् भर्तरि नायाते चिन्तयामास लुब्धकी।
अद्य सायाह्नवेलायामागताः सर्वलुब्धकाः ॥ १६ ॥
तमःस्तोमेन संच्छन्नाश्चतस्रो विदिशो दिशः।
रात्रौ यामद्वयं यातं किं मतंगः समागतः ॥ १७ ॥
किं वा केसरलोभेन[१] सिंहेनैव विदारितः।
किं भुजंगफणारत्नहारी सर्पविषार्दितः ॥ १८ ॥
किं वा वराहदंष्ट्राग्रघातैः पञ्चत्वमागतः।
मधुलोभेन वृक्षाग्रात् स वै प्रपतितो भुवि ॥ १९ ॥
क्वान्वेषयामि पृच्छामि क्व गच्छामि च कं प्रति।
एवं विलप्य बहुधा निवृत्ता स्वं गृहं प्रति ॥ २० ॥
नैवान्नं नो जलं किंचिन्न भुक्तं तद्दिने तया।
चिन्तयन्ती पतिं चापि लुब्धकी त्वनयन्निशाम् ॥ २१ ॥
अथ प्रभाते विमले पुष्कसी वनमाययौ।
अशनार्थं च तस्यान्नमादाय त्वरिता सती ॥ २२ ॥
भ्रममाणा वने तस्मिन् ददर्श महतीं नदीम्।
तस्यास्तीरे समासीनं स्वपतिं प्रेक्ष्य हर्षिता ॥ २३ ॥
तदन्नं कूलतः स्थाप्य नदीं तर्तुं प्रचक्रमे।
निरीक्ष्य चाथ मत्स्यान् स जालप्रोतान् समानयत् ॥ २४ ॥

---

१. 'सिंहस्कन्धकेश' इति हेमचन्द्रः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तावत् तयोक्तश्चण्डोऽसावेहि शीघ्रं च भक्षय।
अन्नं त्वदर्थमानीतमुपोष्य दिवसं मया ॥ २५ ॥
कृतं किमद्य रे मन्द गतेऽहनि च किं कृतम्।
नाशितं च त्वया मूढ लङ्घितेनाद्य पापिना ॥ २६ ॥
नद्यां स्नातौ तथा तौ च दम्पती च शुचिव्रतौ।
यावद् गतश्च भोक्तुं स तावच्छ्वा स्वयमागतः ॥ २७ ॥
तेन सर्वं भक्षितं च तदन्नं स्वयमेव हि।
चण्डी प्रकुपिता चैव श्वानं हन्तुमुपस्थिता ॥ २८ ॥
आवयोर्भक्षितं चान्नमनेनैव च पापिना।
किं च भक्षयसे मूढ भविताद्य बुभुक्षितः ॥ २९ ॥
एवं तयोक्तश्चण्डोऽसौ बभाषे तां शिवप्रियः।
यच्छुना भक्षितं चान्नं तेनाहं परितोषितः ॥ ३० ॥
किमनेन शरीरेण नश्वरेण गतायुषा।
शरीरं दुर्लभं लोके पूज्यते क्षणभंगुरम् ॥ ३१ ॥
ये पुष्णन्ति निजं देहं सर्वभावेन चाहताः।
मूढास्ते पापिनो ज्ञेया लोकद्वयबहिष्कृताः ॥ ३२ ॥
तस्मान्मानं परित्यज्य क्रोधं च दुरवग्रहम्।
स्वस्था भव विमर्शेन तत्त्वबुद्ध्या स्थिरा भव ॥ ३३ ॥
बोधिता तेन चण्डी सा पुष्कसेन तदा भृशम्।
जागरादि च सम्प्राप्तः पुष्कसोऽपि चतुर्दशीम् ॥ ३४ ॥
शिवरात्रिप्रसंगाच्च जायते यद्ध्यसंशयम्।
तज्ज्ञानं परमं प्राप्तः शिवरात्रिप्रसंगतः ॥ ३५ ॥
यामद्वयं च संजातममावस्यां तु तत्र वै।
आगताश्च गणास्तत्र बहवः शिवनोदिताः ॥ ३६ ॥
विमानानि बहून्यत्र आगतानि तदन्तिकम्।
दृष्टानि तेन तान्येव विमानानि गणास्तथा ॥ ३७ ॥
उवाच परया भक्त्या पुष्कसोऽपि च तान् प्रति।
कस्मात् समागता यूयं सर्वे रुद्राक्षधारिणः ॥ ३८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विमानस्थाश्च केचिच्च वृषारूढाश्च केचन।
सर्वे स्फटिकसंकाशाः सर्वे चन्द्रार्धशेखराः ॥ ३९ ॥
कपर्दिनश्चर्मपरीतवाससो
भुजङ्गभोगैः कृतहारभूषणाः।
श्रियान्विता रुद्रसमानवीर्या
यथातथं भो वदतात्मनोचितम् ॥ ४० ॥
पुष्कसेन तदा पृष्टा ऊचुः सर्वे च पार्षदाः।
रुद्रस्य देवदेवस्य संनम्राः कमलेक्षणाः ॥ ४१ ॥

गणा ऊचुः

प्रेषिताःस्मो वयं चण्ड शिवेन परमेष्ठिना।
आगच्छ त्वरितो भूत्वा सस्त्रीको यानमारुह ॥ ४२ ॥
लिङ्गार्चनं कृतं यच्च त्वया रात्रौ शिवस्य च।
तेन कर्मविपाकेन प्राप्तोऽसि शिवसंनिधिम् ॥ ४३ ॥
तथोक्तो वीरभद्रेण उवाच प्रहसन्निव।
पुष्कसोऽपि स्वया बुद्ध्या प्रस्तावसदृशं वचः ॥ ४४ ॥

पुष्कस उवाच

किं मया कृतमद्यैव पापिना हिंसकेन च।
मृगयारसिकेनैव पुष्कसेन दुरात्मना ॥ ४५ ॥
पापाचारो ह्यहं नित्यं कथं स्वर्गं व्रजाम्यहम्।
कथं लिङ्गार्चनमिदं कृतमस्ति तदुच्यताम् ॥ ४६ ॥
परं कौतुकमापन्नः पृच्छामि त्वां यथातथम्।
कथयस्व महाभाग सर्वं चैव यथाविधि ॥ ४७ ॥

वीरभद्र उवाच

देवदेवो महादेवो देवानां पतिरीश्वरः।
परितुष्टोऽद्य हे चण्ड स महेश उमापतिः ॥ ४८ ॥
प्रासंगिकतया माघे कृतं लिङ्गार्चनं त्वया।
शिवतुष्टिकरं चाद्य पूतोऽसि त्वं न संशयः ॥ ४९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शिवरात्र्यां प्रसंगेन कृतमर्चनमेव च।
कोलं निरीक्षमाणेन बिल्वपत्राणि चैव हि ॥ ५० ॥
छेदितानि त्वया चण्ड पतितानि तदैव हि।
लिङ्गस्य मस्तके तानि तेन त्वं सुकृती प्रभो ॥ ५१ ॥
ततश्च जागरो जातो महान् वृक्षोपरि ध्रुवम्।
तेनैव जागरेणैव तुतोष जगदीश्वरः ॥ ५२ ॥
छलेनैव महाभाग कोलसंदर्शनेन हि।
शिवरात्रिदिने चात्र स्वप्रस्ते न च योषितः ॥ ५३ ॥
तेनोपवासेन च जागरेण
तुष्टो ह्यसौ देववरो महात्मा।
तव प्रसादाय महानुभावो
ददाति सर्वान् वरदो महांश्च ॥ ५४ ॥
एवमुक्तस्तदा तेन वीरभद्रेण धीमता।
पुष्कसोऽपि विमानाग्र्यमारुरोह च पश्यताम् ॥ ५५ ॥
गणानां देवतानां च सर्वेषां प्राणिनामपि।
तदा दुन्दुभयो नेदुर्भेर्यस्तूर्याण्यनेकशः ॥ ५६ ॥
वीणावेणुमृदङ्गानि तस्य चाग्रे गतानि च।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ५७ ॥
शिवसांनिध्यमगमच्चण्डोऽसौ तेन कर्मणा।
शिवरात्र्युपवासेन परं स्थानमुपागमत् ॥ ५८ ॥
पुष्कसोऽपि तथा प्राप्तः प्रसंगेन सदाशिवम्।
किं पुनः श्रद्धया युक्ताः शिवाय परमात्मने ॥ ५९ ॥
पुष्पादिकं फलं गन्धं ताम्बूलं भक्ष्यमृद्धिमत्।
ये प्रयच्छन्ति लोकेऽस्मिन् रुद्रास्ते नात्र संशयः ॥ ६० ॥

ऋषय ऊचुः

किं फलं तस्य चोद्देशः केनैव च पुरा कृतम्।
कस्माद् व्रतमिदं जातं कृतं केन पुरा विभो ॥ ६१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोमश उवाच

यदा सृष्टं जगत् सर्वं ब्रह्मणा परमेष्ठिना ।
कालचक्रं तदा जातं पुरा राशिसमन्वितम् ॥ ६२ ॥
द्वादश राशयस्तत्र नक्षत्राणि तथैव च ।
सप्तविंशतिसंख्यानि मुख्यानि कार्यसिद्धये ॥ ६३ ॥
एभिः सर्वं प्रचण्डं च राशिभिरुडुभिस्तथा ।
कालचक्रान्वितः कालः क्रीडयन् सृजते जगत् ॥ ६४ ॥
आब्रह्मस्तम्बपर्यन्तं सृजत्यवति हन्ति च ।
निबद्धमस्ति तेनैव कालेनैकेन भो द्विजाः ॥ ६५ ॥
कालो हि बलवाँल्लोके एक एव न चापरः ।
तस्मात् कालात्मकं सर्वमिदं नास्त्यत्र संशयः ॥ ६६ ॥
आदौ कालः कालनाच्च लोकनायकनायकः ।
ततो लोका हि संजाताः सृष्टिश्च तदनन्तरम् ॥ ६७ ॥
सृष्टेर्लवो हि संजातो लवाच्च क्षणमेव च ।
क्षणाच्च निमिषं जातं प्राणिनां हि निरन्तरम् ॥ ६८ ॥
निमिषाणां च षष्ट्या वै पल इत्यभिधीयते ।
पलैस्तु षष्टिभिश्चैव घटिकैकाभिजायते ॥ ६९ ॥
घटिकानां हि षष्ट्या वै अहोरात्रेति कथ्यते ।
पञ्चदश्यां अहोरात्रैः पक्ष इत्यभिधीयते ॥ ७० ॥
पक्षाभ्यां मास एव स्यान्मासा द्वादश वत्सरः ।
तं कालं ज्ञातुकामेन कार्यं ज्ञानं विचक्षणैः ॥ ७१ ॥
प्रतिपद्दिनमारभ्य पौर्णमास्यन्तमेव च ।
पक्षः पूर्णो हि यस्माच्च पूर्णिमेत्यभिधीयते ॥ ७२ ॥
नष्टस्तु चन्द्रो यस्यां वै अमा सा कथिता बुधैः ।
अग्निष्वात्तादिपितॄणां प्रियातीव बभूव ह ॥ ७३ ॥
त्रिंशद्दिनानि ह्येतानि पुण्यकालयुतानि च ।
तेषां मध्ये विशेषो यस्तं शृणुध्वं द्विजोत्तमाः ॥ ७४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योगानां वा व्यतीपात उडूनां श्रवणस्तथा ।
अमावस्या तिथीनां च पूर्णिमा वै तथैव च ॥ ७५ ॥
संक्रान्तयस्तथा ज्ञेयाः पवित्रा दानकर्मणि ।
तथाष्टमी प्रिया शम्भोर्गणेशस्य चतुर्थिका ॥ ७६ ॥
पञ्चमी नागराजस्य कुमारस्य च षष्ठिका ।
भानोश्च सप्तमी ज्ञेया नवमी चण्डिकाप्रिया ॥ ७७ ॥
ब्रह्मणो दशमी ज्ञेया रुद्रस्यैकादशी तथा ।
विष्णुप्रिया द्वादशी च अन्तकस्य त्रयोदशी ॥ ७८ ॥
चतुर्दशी तथा शम्भोः प्रिया नास्त्यत्र संशयः ।
निशीथसंयुता या तु कृष्णपक्षे चतुर्दशी ॥ ७९ ॥
उपोष्या सा तिथिः श्रेष्ठा शिवसायुज्यकारिणी ।
शिवरात्रीति विख्याता सर्वपापप्रणाशिनी ॥ ८० ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणी विधवा काचित् पुरा ह्यासीच्च चञ्चला ॥ ८१ ॥
श्वपचाभिरता सा च कामुकी कामहेतुतः ।
तस्यां तस्य सुतो जातः श्वपचस्य दुरात्मनः ॥ ८२ ॥
दुःसहो दुष्टनामात्मा सर्वधर्मबहिष्कृतः ।
कितवश्च सुरापायी स्तेयी च गुरुतल्पगः ॥ ८३ ॥
मृगयुश्च दुरात्मासौ कर्मचाण्डाल एव सः ।
अधर्मिष्ठो ह्यसद्वृत्तः कदाचिच्च शिवालयम् ॥ ८४ ॥
शिवरात्र्यां च सम्प्राप्तो ह्युषितः शिवसंनिधौ ।
श्रवणं शैवशास्त्रस्य यदृच्छाजातमन्तिके ॥ ८५ ॥
तेन कर्मविपाकेन पुण्यां योनिमवाप्तवान् ।
भुक्त्वा पुण्यतमाँल्लोकानुषित्वा शाश्वतीः समाः ॥ ८६ ॥
चित्राङ्गदस्य पुत्रोऽभूद् भूपालेश्वरलक्षणः ।
नाम्ना विचित्रवीर्योऽसौ सुभगः सुन्दरीप्रियः ॥ ८७ ॥
राज्यं महत्तरं प्राप्य निःस्तम्भो हि महानभूत् ।
शिवे भक्तिं प्रकुर्वाणः शिवकर्मपरोऽभवत् ॥ ८८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शैवशास्त्रं पुरस्कृत्य शिवपूजनतत्परः ।
रात्रौ जागरणं यत्नात् करोति शिवसंनिधौ ॥ ८९ ॥
शिवस्य गाथां गायंस्तु आनन्दाश्रुकणान् मुहुः ।
प्रमुञ्चंश्चैव नेत्राभ्यां रोमाञ्चपुलकावृतः ॥ ९० ॥
आयुष्यं च गतं तस्य शिवध्यानपरस्य च ।
शिवो हि सुलभो लोके पशूनां ज्ञानिनामपि ॥ ९१ ॥
संसेवितुं सुखप्राप्त्यै ह्येक एव सदाशिवः ।
शिवरात्र्युपवासेन प्राप्तो ज्ञानमनुत्तमम् ॥ ९२ ॥
ज्ञानात् सर्वमनुप्राप्तं भूतसाम्यं निरन्तरम् ।
विना शिवेन यत् किंचिन्नास्ति वस्त्वत्र न क्वचित् ॥ ९३ ॥
प्राप्तज्ञानस्तदा राजा जातो हि शिववल्लभः ।
मुक्तिं सायुज्यतां प्राप्तः शिवरात्रेरुपोषणात् ॥ ९४ ॥
तेन लब्धं शिवाज्जन्म पुरा यत् कथितं मया ।
दाक्षायणी वियोगाच्च जटाजूटेन विस्तरात् ॥ ९५ ॥
वीरभद्रेति विख्यातो दक्षयज्ञविनाशनः ।
य उत्पन्नो मस्तकाच्च शिवस्य परमात्मनः ॥ ९६ ॥
शिवरात्रिव्रतेनैव तारिता बहवः पुरा ।
प्राप्ताः सिद्धिं पुरा विप्रा भरताद्याश्च देहिनः ॥ ९७ ॥
मान्धाता धुन्धुमारश्च हरिश्चन्द्रादयो नृपाः ।
प्राप्ताः सिद्धिमनेनैव व्रतेन परमेण हि ॥ ९८ ॥
शिवरात्रिसमं नास्ति व्रतं पापक्षयावहम् ।
यत् कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ९९ ॥
उपवासं करिष्यन्ति जागरेण समन्वितम् ।
यथोक्तशास्त्रमार्गेण तेषां मोक्षो न संशयः ॥ १०० ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
प्राप्नोति तत् फलं सर्वं नात्र कार्या विचारणा ॥ १०१ ॥

इति श्रीस्कन्दमहापुराणे माहेश्वरखण्डे केदारखण्डे
शिवरात्रिव्रतकथा समाप्ता ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ श्रीहरि: ॥

गीताप्रेस, गोरखपुरसे प्रकाशित उपनिषद्

ईशादि नौ उपनिषद्	अन्वय, हिंदी व्याख्यासहित
बृहदारण्यकोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
छान्दोग्योपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
ईशावास्योपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
केनोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
कठोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
माण्डूक्योपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
मुण्डकोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
प्रश्नोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
तैत्तिरीयोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
ऐतरेयोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित
श्वेताश्वतरोपनिषद्	हिंदी अनुवाद शांकरभाष्यसहित

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ श्रीहरिः ॥

गीताप्रेसकी निजी दूकानें तथा स्टेशन-स्टाल

गीताप्रेस, गोरखपुर—२७३००५; फैक्स (०५५१) ३३६९९७, फोन (०५५१) ३३४७२१

कलकत्ता-	गोविन्दभवन-कार्यालय	✆(०३३) २३८६८९४
पिन-७००००७	१५१, महात्मा गाँधीरोड	२३८०२५९
दिल्ली-	गीताप्रेस, गोरखपुरकी पुस्तक-दूकान	✆(०११) ३२६९६७८
पिन-११०००६	२६०९, नयी सड़क	
पटना-	गीताप्रेस, गोरखपुरकी पुस्तक-दूकान	✆(०६१२) ६[illegible]७९
पिन-८००००४	अशोकराजपथ, बड़े अस्पतालके सदर फाटकके सामने	
कानपुर-	गीताप्रेस, गोरखपुरकी पुस्तक-दूकान	✆(०५१२) ३५२३[illegible]
पिन-२०८००१	२४/५५, बिरहाना रोड	
वाराणसी-	गीताप्रेस, गोरखपुरकी पुस्तक-दूकान	✆(०५४२) ३५३५५१
पिन-२२१००१	५९/९, नीचीबाग	
हरिद्वार-	गीताप्रेस, गोरखपुरकी पुस्तक-दूकान	
पिन-२४९४०१	सब्जीमण्डी, मोतीबाजार	
ऋषिकेश-	गीताभवन, गङ्गापार, पो० स्वर्गाश्रम	✆(०१३६४) ३०१२२
पिन-२४९३०४		

स्टेशन-स्टाल

(१) दिल्ली जंक्शन, प्लेटफार्म नं० १ (२) नयी दिल्ली, प्लेटफार्म नं० ८-९ (३) अन्तर्राज्यीय बस-अड्डा—दिल्ली (४) हजरत निजामुद्दीन (दिल्ली), प्लेटफार्म नं० ४-५ (५) कानपुर, प्लेटफार्म नं० १ (६) गोरखपुर, प्लेटफार्म नं० १ (७) वाराणसी, प्लेटफार्म नं० ३ (८) हरिद्वार, प्लेटफार्म नं० १ (९) कोटा (राजस्थान), प्लेटफार्म नं० १ (१०) पटना-जंक्शन, पुस्तक-ट्राली (११) हावड़ा, न्यू कॉम्पलेक्स, प्लेटफार्म नं० १८ के पास (१२) मुगलसराय जं०, प्लेटफार्म नं० ३-४ (१३) लखनऊ (N.E.Railway) (१४) सिकन्दराबाद, प्लेटफार्म नं० १, (१५) सियालदा मेन, प्लेटफार्म नं० ८।

अन्य अधिकृत पुस्तक-विक्रेता— श्रीगीताप्रेस-पुस्तक-प्रचारकेन्द्र, 'बुलियन बिल्डिंग', जौहरी बाजार, जयपुर-३०२००३ ✆(०१४१) ५६३३७९

अंग्रेजी एवं दक्षिण भारतीय भाषा-प्रकाशनके प्रमुख विक्रेता

गोपाल-सेवा-ट्रस्ट-८२ कृष्णा टाकीज रोड, इरोड-६३८००३ ✆(०४२४) २१३९७६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.